।।जयश्रीस्वामिनारायण।।

श्रीहरिवाक्यसुधासिन्धौ उपनिषदां प्रभावः

---

## अथ चतुर्थोऽध्यायः

भारतीयसंस्कृतिपरिपुष्टकापवर्गफलदतत्त्वचिन्तनेऽध्यात्मवातार्याः स्थानं सर्वत्रेद रीदृश्यते, भारतेवर्षेऽनेकेऽऽचार्याः सम्भूताः तत्तत्सम्प्रदायस्थापकाः वैदिकमतसञ्चालकाः प्रवर्तकाश्च, तेषु भगवत्स्वामिनारायणानामद्वितीयत्वं स्वतः सिद्धम्, तेषामुपदेशस्वरूपपरावाणीस्वरूपाभिप्रायस्वरूपरहस्यस्वरूपश्रीहरिवाक्यसुधासिन्धोः सन्दर्भतात् तेषा त्वलौकिकशैल्याः परिचयो नयनपथमागम्यति, सर्वेऽपि सम्प्रदायप्रवर्तकाः वेद.मतानुसारेणैव स्वाभिष्टसिद्धान्तं प्रवर्तयामासुः, तद्विना न कोऽपि समर्थोऽस्ति सम्प्रदायस्थापनकार्ये, यद्यप्यघटनात्तघटितसामर्थ्यवद्भगवत्स्वामिनारायणस्य विषये नैतादृशी विचारधाराया अवकाशः तथापि ते वेदानुसारेणैव सम्प्रदायं प्रवर्तयामास अत एव प्रसिद्धतमानि तेषां नामानि अखण्डितार्षमर्यादः व्याससिद्धान्तबोधकश्च।

हरिवाक्यसुधासिन्धौ सर्वत्र, श्रुतिस्तदनुरूपा याः स्मृतयः तासामेवमतानुसारेण सुनिरूपिताः सन्ति विविधविषयाः तेष्वचित्तत्त्वस्य हेयतया ज्ञातव्यत्वात् परेश्वरस्य च तदुपादेयतया ज्ञातव्यत्वात्, उभयोरर्पितत्वयोर्ज्ञातुरधिकारिणश्चेतनस्य स्वरूप प्रप्रथमं ज्ञातव्यमिति। अस्य क्रमस्योपदेशिका च श्रुतिः [1] "भोक्ता भोग्यं प्रेरितार च मत्वाजुष्टस्ततस्तेनामृततत्वमेति" इत्यात्मिका, तत्वत्रयोपदेशसमये विशिष्टाद्वैतसिद्धान्तनिर्धारणशिरोमणियामुनाचार्याः [2] "चिदचिदीश्वरस्वभाव" इत्यादिना तथा च "अशेष चिदचिद्वस्तुशेषिणे" इत्यादिना भाष्यकारा अपि आत्मानमेव प्रथमं प्रख्यापयन्ति। तद्वदत्रापि प्रपथमं जीवस्वरूपनिरूपणं क्रियते।

भगवत्स्वामिनारायणस्य मतानुसारेण तु जीवोऽनादिदेहेन्द्रियमनप्राणधीभ्योविलक्षण चिद्रूपो, ज्ञानवान्, नित्यो, निर्विकारः, स्वप्रकाशोऽतिनिर्मल., व्यापक., दिव्योऽच्छेद्यादिलक्षण निरवयवः ज्ञानाश्रयभूतः, नियाम्यः, धार्य., शेषभूतश्चेश्वरेश्वरस्य, अणु च।

**अनादित्वम्—** आस्तिकदर्शनेषु न कुत्रापि जीवस्योत्पत्तिविषयकचर्चा दृश्यते, तेषु जीवानामनादित्वपक्षसमर्थने एवं दर्शनकाराणां रूचिः प्रत्यक्षा भवति। भगवानपि दुर्गपुरीयप्रथमप्रकरणस्य सप्तमतरंगे -

> जीवेशब्रह्मकृष्णानां मायायाश्चापि वास्तवः।
> अस्त्यनादिरयं भेद इति जानीहि निश्चितम्।।17।।

तथा च -

---

1 श्वेताश्वतरोपनिषद् 1/12

2 स्तोत्ररत्न 7

।।जयश्रीस्वामिनारायण।।

## श्रीहरिवाक्यसुधासिन्धौ उपनिषदां प्रभाव:

---

[1]वेदादीनि मया सर्वसच्छास्त्राण्यवगाह्य य:।
सिद्धान्तो निश्चितस्तं त्वमव्यग्र: सन् निशामय।।

जीवा ईशा ब्रह्म माया परमात्मा इत्यमी।
अनादयो भवन्त्येव पंच चापि न संशय.।।

तथा च -

[2]चिद्रूपो ज्ञानवान्नित्यो निर्विकार: सुखात्मक·।
स्थिर· सदैकरूपश्च स्वप्रकाशोऽति निर्मल·।।

इत्याद्यनेकस्थलेषु जीवानामनादित्वं कण्ठतउक्त भगवता, अनादिभावस्य ध्वंसाऽभावान्नित्यत्वम्, उत्पत्तिध्वसरहितत्वम्, उत्पत्ति. स्वरूपस्याऽऽद्यक्षणसम्बन्ध· स च नास्त्यात्मन: अत एवान्तिमक्षणवियोगो ध्वंसोऽपि नास्ति। आद्यक्षणसम्बन्धसत्वे विकारवद् भूत्वान्तिमक्षणसम्बन्धवान् भवति तदुक्त गीतायाम् -

[3]"जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि।।"

उपनिषत्स्वपि जीवस्यानादित्वं नित्यत्वं च स्फुटरूपेण प्रतिपादितमस्ति यथा [4]"न जायते म्रियते वा विपश्चित्" [5]अजो नित्य: शाश्वतोऽयं पुराणो नित्यो [6]नित्यानां चेतनश्चेतनाना [7]नित्यानन्दं सदैकरसम् [8]नित्य: सर्वगतो ह्यात्मा कूटस्थो दोषवर्जित. [9]नित्य विभुं सर्वगतं सुसूक्ष्मं च तदव्ययम् इत्यादिका:। तथा च स्मृतय.- [10]नित्य. सर्वगत स्थाणुरचलोऽय सनातन: [11]नित्यतृप्तो निराश्रय: [12]नित्यं वा मन्यसे मृतम्

जीवानामनादित्वस्वीकारे सर्वेषामाचार्यवर्याणां मतैक्यमस्त्येव सर्वविदितम्।

---

1 श्रीहरिवाक्यसुधासिन्धु. त 233 श्लोक 28, 29
2 श्रीहरिवाक्यसुधासिन्धु त 82 श्लोक 12
3 श्रीमद्भगवद्गीता अ 2
4 कठोपनिषद् 2/18
5 कठोपनिषद् 2/18 भगवद्गीता अ 2 श्लो 20
6 कठोपनिषद 5/13
7 नृसिंहोपनिषद् 1/1
8 जाबालदर्शनोपनिषद् 10/2
9 मुण्डकोपनिषद् 1/1/6
10 भगवद्गीता 2/24
11 भ गी 2/20
12 भ गी 2/26

## देहेन्द्रियमनःप्राणधीभ्यो विलक्षणः–

नन्वात्मनो नित्यत्व स्वीकारे "प्रजापतिः प्रजा असृजत" [1]"सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः" [2]"यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रत्यभिसंविशन्ति" [3]"यतः प्रसूता जगतः प्रसूतीस्तोयेन जीवान् विससर्ज भूम्याम्" इत्यादिकाः जीवस्य जन्ममरणप्रतिपादिका श्रुतयो बाध्येरन् इति चेन्न। आत्मनो देह संबन्धस्यैव जन्मनाभिहितत्वात्, देहवियोगस्य च मरणशब्देनाभिधीयमानत्वात्। तथोक्तं भगवता हरिवाक्यसुधासिन्धौ -

[4]आद्यन्तवान्सावयवो नैकरूपश्च मायिकः।
दृश्यस्य भौतिकः पिण्डो देहो नात्मेति दृश्यताम्।

[5]विप्रत्वादिर्न तस्यास्ति जातिः कापि च कस्यचित्।
स पुत्रो न पिता नापि न बन्धुर्नपतिश्च वा।।
देहाननेकाञ्जग्राह विससर्ज च तानसौ।
तदापि न मृतो नूनं यतो जीवन्त वर्तते।।

[6]नायं पिता न मातेयं न गृहं न धनं तव।
नित्यसिद्धश्च चिद्रूपस्त्वं तु दासोऽसि वै हरेः।।

[7]तस्माद्देहाच्च दैह्येभ्यः पृथगात्मास्ति चिन्मयः।
यः स एवाहमस्मीति बुद्ध्वा तत्प्रीतिमृत्सृजेत्।।

एवं प्रकारेणानेकेषु स्थलेषु भगवता देहेन्द्रियमनप्राणधीभ्यो भिन्न आत्मा इति प्रतिपादितमस्ति, अनेन चार्वाकमतनिरासः।

---

[1] छान्दोग्योपनिषद् 6/8/4
[2] तैत्तिरीयोपनिषद् 3/1
[3] महानारायणोपनिषद् 1/4
[4] हरिवाक्यसुधासिन्धुः त 82, श्लो 11
[5] हरिवाक्यसुधासिन्धु त 262 श्लो 12, 15
[6] हरिवाक्यसुधासिन्धु त 70, श्लो 15
[7] हरिवाक्यसुधासिन्धुः त 242 श्लो 9

---

**चार्वाकमतनिरसनम्** चार्वाकदर्शनं तु नास्तिकदर्शनं विद्यते, न तस्य साहित्यं स्वतन्त्ररूपेण दृश्यते परंतु अध्यात्मवादी दर्शनेषु चार्वाकमतं पूर्वपक्षरूपेण प्रस्थाप्यते, हरिभद्रसूरे षड्दर्शनसमुच्चये, माधवाचार्यस्य सर्वदर्शनसंग्रहे च चार्वाकदर्शनसिद्धान्ताना विशदरूपेण चर्चा विद्यते, चार्वाकस्तु भौतिकवादीदर्शनम्. तत्र नित्य-आत्म-परमात्म-कर्म-पुनर्जन्म-परलोकादिनां प्रतिपादनपरायणस्याध्यात्मदर्शनस्य तन्मतसमर्थकास्तिकानां च "न स्वर्गो नापवर्गो वा नैवात्मा पारलौकिक" इत्यादिवाक्यै खण्डनं विद्यते। चार्वाकाः प्रत्यक्षमेकं प्रमाणमेव स्वीकुर्वन्ति, तन्नात्मनि सभवेदतएव 'आत्मा' इति चार्वाकदर्शनजन्यज्ञानमीमांसातः बहिर्भूतो विषय.। शिक्षापत्र्या अर्थदीपिकाया भाष्ये सिद्धित्रये च चार्वाकमतखण्डनपूर्वक देहेन्द्रियमनःप्राणधीभ्यो भिन्न आत्मा इति सम्यङ्निरूपितः तद्यथा -

ननु- नास्ति भूसंघातादृते कश्चित्चेतयिता जीवः, न च भूतसंघाते चैतन्यासम्भवा शंका, संहतिविशेषमुपगत एव तस्मिश्चैतन्योत्पादनात्, स चैषं धरणिसलिलतेजःपवनानामेववपुरात्मना, अन्यतरस्मिन्ननवस्थितस्याप्यस्य संहति विशेषे समुदायस्तु किण्वादिभ्योमदशक्तिवदुपपद्यते, नाप्यहंग्रहनिर्वाहायाऽऽत्मा नामातीन्द्रियोऽपेक्ष्यते, आहितचैतन्येन वपुरात्मना भूतसंघातेनैव तदुत्पत्ते., अत एत स्थूलोऽहम्, कृशोऽहम् इति सामानाधिकरण्यमपि सूपपद्यते, यच्चैकस्यैव देहस्येदंग्रहाहंग्रहगोचरत्वम् एकस्यामेव दृशिक्रियायां कर्मत्वं कर्तृत्वं च, तत्तु देहात्मातिरिक्तात्मवादे देवदत्त आत्मनाऽऽत्मानं निध्यायतीत्यादाविवाऽऽकारभेदेनैव निर्वाह्यम्, अथ यदि चैतन्य तत्कार्यं सुखादि दृश्यस्य देहस्यैव धर्मः धर्मीव दृश्यते नाम, न किन्तु दृश्यायाः पृथिव्या धर्मो गन्धो दृश्यते, तद्विषयाणामेष स्वभावो यदिन्द्रियविशेषसापेक्षत्वम्, इत्थं च चैतन्य तु मानसमात्रगोचरं कथमिव धर्मीदिह इव दृश्येत्, एतेन- देहस्थैवात्मत्वेऽहमर्थेदमर्थयो रैक्येन स्वस्मिन्निव परस्मिन्नप्यहंग्रहप्रसंग इति परास्तम्, धर्मिणो देहस्य बाह्यमानसोभयविषयत्वेऽपि विशेषणभूतस्य चैतन्यस्य मानसमात्रगोचरताहंग्रहस्य च चैतन्यावलम्बितया परस्मिन्स्थौल्यादिना दृश्येनेदंग्रहवदहंग्रहस्यासंभवात्, स्थूलोऽहम्, कृशोऽहमितिस्थौल्यादिबाह्यसाक्षात्कारेऽहताया अलौकिकमर्यादया भानात्। वस्तुतस्त्वहमर्थेदमर्थयोरभेदे न काप्यपनुपत्ति.। स्वस्मिन्निव परस्मिन्नप्यहं व्यवहारस्तु शब्दस्वभावभेदान्न घटेत्, सहि शब्द उच्चारयितृ व्यक्तावेव व्युत्पन्नः, परस्मिन्नहंप्रत्ययापादनमपि शब्दतो विभीषिकामत्रम् न हि पिण्डविशेषादृते रूपादिवत् किमप्यहमित्वस्ति, स्वस्मिन्निव परस्मिन्नपि विस्फारितनयनेन तत्तदाकारविशिष्ट आत्मा गृह्यत एव, अनुभूयमानस्यार्थस्योल्लेखमात्रं तु शब्दः, तत्र परानुभवस्योल्लेखे नाहं शब्द· समर्थः, अतोनाहंग्रहः परिस्मन्निति प्रवादः, सुखादीनां सञ्जातचैतन्यदेहशब्दाभिलिप्यभूत संधातविशेषधर्मत्वेऽप्यान्तरत्वात्तेषु परेन्द्रियसम्प्रयोगासम्भवान्न तैराकारैः परस्य ग्रहणम्. तत्सिद्धमात्मतत्वं वपुषोऽनन्यदिति।

**अत्र तत्वविदः-** दुर्निरूपोऽयं वपुषि चैतन्यगुणयोगः, वपुरारम्भकेषु भूतेषु तस्यानुपलम्भात्, आरम्भके तद्विहीन आरभ्ये तद्योगात्।

कार्यविशेषगुणस्यकारणविशेषगुणपूर्वकत्वनियमात्, घटे रूपादिकं कपालरूपादिपूर्वकं दृष्टं, ननु-किण्वादिभ्योमदशक्तिवदपूर्वचैतन्याविर्भावस्यं संघातविशेषे प्रात्यक्षिकस्य का नाम बाधा रूपादिषु क्वचिदनुभूतेन कारण गुणपूर्वकत्वेन, नह्यानुमानिकेन प्रात्यक्षिकार्यबाधः, वस्तुतोऽनुमानं प्रमाणमेव न, धूमं पश्यतो वह्न्यर्थाप्रवृत्तिस्तु संशयतो भ्रान्त्या वा, न प्रमातः, अर्थलाभस्तु यादृच्छिकः, अथ व्याप्तिनिश्चये प्रमापके जाग्रति किमिति संशयादिकल्पनम्, मैवम्, न जागर्ति तु सः, दुःसम्पादत्वात्तस्य, न च वाच्यं साध्यहेतोः, शतशः सहचारदर्शनात्तत्सम्पत्तिरिति, महानसादिषु कतिपयेषु स्थानेषु कतिपयवह्निधूमव्यक्तिनां दृष्टेऽपि साहचर्येऽतीतानागतानामनन्तानां वह्निधूपव्यक्तिनां वर्तमानानां च विप्रकृष्टदेशस्थानां साहचर्यादर्शनेनानुभूतसाहचर्यांशतोऽननुभूत साहचर्यांशस्य भूयस्त्वात्तेषु व्यभिचारशंकया व्याप्तिनिश्चयस्यासम्भवात्, मैवम्, अनेकवह्निधूमव्यक्तिषु नियमतः सहचरिततया महानसाद्यधिकरणेषु सहस्त्रशः समुपलब्धासु सतीषु तत्सजातीयास्वन्यास्वतीतानागतादृष्टव्यक्तिषु विना संशायकलिंगं व्यभिचारशंकया अनुदयात्, नहि सुस्पष्टं दृष्टसजातीये वस्तुनि बिना लिंगमदृष्टतामात्रेण संशयः प्रामाणिकः, तस्मात्सामान्यप्रत्यासत्ति बलात्कात्स्र्येन व्याप्ति निश्चयः स्यादेवेति नानुमानप्रमाणम्, किञ्चानुमानस्य सर्वथाऽप्रामाण्ये लोकव्यवहारोच्छेदः स्यात्, बाला हि विशालेनापि नयनेन तद्द्रव्यमुपलभमानास्तदानीं पिण्डमात्रमेवावगच्छन्ति, न तु नामजात्यादिविशेषम्, तत्परिच्छेदश्च तेषां वृद्धव्यवहारादिपरामर्श मूलकानुमानेनैव अपूर्वपरिदृष्टे क्वचनारण्यकेऽपि पिण्डविशेषे ग्रामीणस्य गोसदृशो गवय इत्यतिदेशवाक्यार्थस्मरणतो जायमानो गवय इति निश्चयोऽप्यनुमान मूलक एव। किं बहुना-अनुमानप्रामाण्यनिरासे लिंगविशेषमाश्रयतस्तव तत्रानुमानमेव शरणम्, यच्चोक्तम्-प्रात्यक्षिकेऽर्थे का नाम बाधानुमानेनेति तत्र वक्तव्यम्, अपि नाम गर्भे जायमानं चैतन्यगुणयोगं क्वचित्साक्षात्कर्तुमिष्टे? चैतन्यं वा रूपौष्ण्यादिवत् किं बाह्यम? मानसं चेदपि तत् तदात्मसंवेद्यमेव तु तत्, परत्र तु चेष्ट्यानुमेयमेव तत्, न च स्वात्मना वा स्वस्य चैतन्याविर्भावप्रकारं साक्षात्कर्तुमिष्टे, तदुक्तानुमानेनापूर्वं चैतन्यादिर्भाववादो बाध्यत एव, न च किण्विादिभ्योमदशक्तेराविर्भवन्त्या अकारणगुणपूर्वकत्वेनोक्तानुमानस्यानैकान्त्यमिति वाच्यम्, कार्यगतविशेषगुणस्यैव तथात्वनियमात्, मदशक्तेश्च सामान्यगुणत्वात्, यदि पुनरपूर्वचैतन्याविर्भाववादमपहाय कारणगुणपूर्वक चैतन्याविर्भाववादमाश्रयसे, हन्त। तर्हि वपुषि चैतन्योपपादनाय तदारम्भकेषु हस्तपादादिषु चैतन्यं तेषु तदुपपादनाय तदारंभकेषुचिदिति यावद्देहारंभकधाराविश्रान्ति तत्र चैतन्यं पर्याप्तमिति तैस्तैः परंपरयारब्धस्यावयविनो वपुषो बहुचेतनारब्धत्वापातेन बहुचेतनसमुदायतापत्यांगागिभाव व्यवस्था हीयेत। स्वमर्यादातिलंघनमपि।

ननु पाकेन घटादिषु रूपान्तरस्याकरणपूर्वकस्योदयात्पाकजस्थल उक्त नियमाभावेन विलक्षणपाकबलाद् गर्भ एव सहसा चैतन्यमपूर्वमाविर्भवेदेव, संश्लेषविशेषमात्रेण क्वचिदपूर्वरूपाविर्भावाद्यभिचरितश्च स नियमः, दृश्यते हि सपदि सलिले सुधाहारिद्रचूर्णसंश्लेषमात्रतो रक्तिमा, अस्तु नामैवम्, तथापि संजातस्य तस्य चैतन्यस्य कुतो न यावद् द्रव्यभाविता, पाकजस्य यावद्द्रव्यभाविता दृष्टा, नहि चैतन्यं वपुषि तथोपलभ्यते, दृढेऽपि चैतन्यं सुषुप्त्यादिषु विलीयते, सुखादिकमप्यमेव नापिविलक्षणवस्तुसश्लेषमात्रेण जातस्यापि रक्तिम्नः कदाप्यपगमः सलिलतः, तस्मादिदं चैतन्यसुखादि

प्रतिदिनमपगच्छदुपगच्छदयावद्द्रव्यभावितया न वपुषो धर्म इति विज्ञायते, पाकबलाद् वा संश्लेषविशेषाद् वोत्पन्नस्य पुन: पुनरपगमोपगमयोरसम्भवात्। न च सुषुप्तौ नापगच्छति चैतन्यं न वा प्रबोधे पुनरागच्छति किन्तु सुषुप्तावनुद्भूतं प्रबोधे तद्भूतमिति तु भिदा, तच्चैतन्यं यावद्द्रव्यभाव्येवेति न काचित्क्षतिरिति वाच्यम्, चैतन्स्य घटादिवदजडस्य स्वरूपसत्तयैव प्रकाशावश्यम्भावात्, अस्ति परमनुद्भूतमिति वक्तुमशक्यत्वात्, यथा वेदान्तिनो बाह्यवृत्तिविधुरा केवलाऽहमिति चैतन्यमात्रस्फूर्ति. सुषुप्तावप्यस्तीति कथयन्ति तथा वयमपि कथयाम इति भवता न शक्यते वक्तुम्, गुणस्य हि चैतन्यस्य न निराश्रयस्फूर्ति: सम्भाविता, अपि तु साश्रयैव, वेदान्तिनां तु देहातिरिक्ताभ्युपगमेन सहैवाश्रयेण विना बाह्यसंश्लेषं स्फूर्तिर्भवेत्, तव तु देहस्यैव चैतन्याश्रयतयाऽऽश्रयेण सह यदि स्फुरेत् तदा देहेन सहैवेति बाह्यसंश्लेषं विना केवलान्तर स्फूर्तिश्चैतन्यस्य कथं घटेत्। निर्विशेषज्ञानवादिभिरिव सर्वथा निर्विषयं ज्ञानम् अस्माभि: सुषुप्तिसमयेऽभ्युपगम्यत इति तु न साम्प्रतम्। ते हि तदेवात्मस्वरूपमभ्युपगच्छन्ति, अतस्तेषां तथोक्तिर्घटेत नाम, बाह्य पिण्डविशेषं चैतन्यगुणकमभ्युपगच्छतस्तव तथोक्तिर्न घटेत। यदि तन्मतमनुसरस्यत्र, तर्हि देहविलक्षणस्य तस्यैवात्मत्वमभ्युपगत प्रायम्। वस्तुतो ज्ञानस्य तथात्वमेव तु न घटते. सर्वथा निर्विषय तथापि तज्ज्ञानमित्युक्तिर्हि वन्ध्यावीरप्रसूश्चेतिवद्विप्रतिषिद्धा, नापि शब्दस्येव चैतन्यस्याव्याप्यवृत्तित्वाश्रयणमुचितम्, आविर्भूतचैतन्यविशेषस्यैव संघातविशेषस्य तवमत आत्मत्वेन तच्छून्यदशायामात्मन एव विलोप प्रसंगात्, किञ्च शब्दो वा किमित्ययावद्द्रव्यभावी, नहि भवता नित्याकाशधर्मत्वं तस्याभ्युपगम्यते, आकाशस्यैवानंगिकारात्, यदि वायोर्धर्म: आश्रयनाशेनैवं तन्नाशोपपादनसम्भवात्।

देहानतिरिक्ताहमर्थवादिना त्वया निरूद्धसकलबाह्येन्द्रियवृत्तेरवहितमनसोऽहमित्यात्मानमनुभवतो मानसप्रत्यक्षे विषयो धर्मी क इति विवेचनीयम्, देहातिरिक्तात्मानभ्युपगमेन स्थूलोऽयं देह एव धर्मी प्रतीयत इति वक्तव्यम्, एवं च सति करचरणाद्यवयवानामपि तत्र भानमवर्जनीयमापतेत्, रूपित्वेन प्रत्यक्षे स्पर्शीप्रतिभानवदिति तु न, तयोरिन्द्रिय भेदनियमात्, इह त्ववयविनो भूतसंघातस्य मानसग्राह्यत्वे तदवयवानामपि तथात्वस्यौचित्यात्, न च लोके कश्चिदप्यवयवाननुभवन्नवयविनमनु भवति। अवयविनि समुपलभ्यमानेऽवयवाना सहोपलम्भनियमो बाह्यवृत्तावेव नान्तरवृत्ताविति त्वसम्भव उक्तिकमविशेषात्।

समेषां चार्वाका मतनिरासाय युक्तित्रयात्र ज्ञातव्या, तत्र प्रथमायुक्ति: वर्तते यत्, आत्मासदा अहमहमित्याकारेण प्रतीयते (मुक्तावस्थायामपि अहं ज्ञानघन., अहं सच्चिदानन्द:, अहमात्मा, अहं भगवत्समस्वरूप:, अहमक्षर सम:, अहं दिव्यगुणैश्वर्यसामर्थ्यशक्तिमानित्येव जीवानां तथा च विशिष्टोऽहं, शरीर्यहम्, परब्रह्माहम् एकोऽहमित्यपरोक्षसाक्षात्कार परब्रह्मणा अपि संभवेत्, एकमेवाद्वितीयमिति नामरूपगुणादिविशिष्टाऽपरोक्षसाक्षात्कारस्य सर्वत्र स्वीकारात्) परञ्च देहादिका -मम देह, ममेन्द्रियाणि, मम मन, मम प्राणा, इत्यादिरूपेण सदा आत्माश्रितत्वेन इद शरीरम्, इमानीन्द्रियाणि, इत्यादिरूपेण इदत्वेन च प्रतीयन्ते, अत एव प्रतीत्याकारभेदात् उभयोर्भेद: सिद्ध्यति, देहादिका., सर्वदा नो भासन्ते कदाचिद्त्जाग्रद् दशाया

स्थूलोऽहमित्यादिरूपेण लभ्यन्ते कदाचित् (सुषुप्तौ) च नोपलभ्यन्ते आत्मनश्च सदोपलम्भो भवतीति भिद्यते देहादिभ्यः आत्मा अथवा जन्ममरणभाक्त्वेन देहादीनां कदाचिदुपलब्धिः कदाचिच्चानुपलब्धिः आत्मनश्च नित्यत्वात् सर्वदोपलब्धिर्भवति। एवमेव चक्षुरादि रूपेणोपलभ्यमानानीन्द्रियाणि आन्ध्यबाधिर्यादौ संजाते नोपलभ्यन्ते संकल्पादि हेतुतयोपलभ्यमानं मनो मूढावस्थायां नोपलभ्यते, मोहाद्यवस्थायामुच्छ्वास निःश्वासरूपेणोपलभ्यमानानां प्राणानामुपलब्धिर्नहि भवति, ज्ञानमपि विषयग्रहणवेलायां नानुभूयते, आत्मा च नित्यत्वान्नहि म्रियते, चक्षुः श्रोत्राभ्यां सम्पन्नः इदानीमन्धो जातः, बधिरो जातः, किञ्च प्राक् सुविशदमनस्कोऽहमिदानीं न किञ्चिज् जानामि, तदानीमहं निष्प्राणः इदानीं सप्राणो जातो, मम प्राग्ज्ञानमजनिः, इदानीं नष्टमित्यादिप्रकारेणानुभविताऽऽरूपेण एतेषामुपलम्भदशायामनुपलम्भदशायां च सदोपलभ्यते इति द्वितीया युक्तिः अथ तृतीया-एतेषां बहुत्वादि-किञ्च इमे प्राणाः अनेके सन्ति तथाहि- अनेकावयवसंघातात्मकत्वाद्देहस्यानेकत्वम्, चक्षुः श्रोत्रादि भेदेनेन्द्रियाणामनेकत्वम्, मनोबुद्ध्यहंकारचित्तभेदेन मनसोऽनेकत्वम्, प्राणापानादि भेदेन प्राणस्यानेकत्वं ज्ञानभेदेन च बुद्धेरनेकत्वम् सिद्ध्यति किन्तु आत्मा सदैक एवेति भिद्यते देहादिभ्यः।

नात्र तर्कबलं केवलं प्रमाणबलमपि वर्तते यथा [1]"पञ्चविंशोह्यात्मा" इत्यादिकाः श्रुतयः [2]"वासांसि जीर्णानि यथाविहाय, नवानि गृह्णाति नरोऽपराणि। तथा शरीराणि विहाय जीर्णान्यनानिसंयाति नवानि देहि"।। समस्तावयवेभ्यस्तं पृथग्भूतो व्यवस्थित.। कोऽहमित्येव निपुणो भूत्वा चिन्तय पार्थिव। । पञ्चभूतात्मके देहे देहीमोहतमोवृतः। अहं ममैतदित्युच्चै कुरूते कुमतिर्मतिम्।। इत्यादिकाः स्मृतयश्च आत्मानं शरीरादिभ्यो विलक्षणं साधयन्ति।

सांख्यसूत्रैर्देहात्मसाधर्म्यवैधर्म्यमुक्तम् तद्यथा -

असंगो ह्ययं पुरूषः (साख्यसूत्रम्-1/15)
न, नित्यशुद्धबुद्धमुक्तस्वभावस्य तद्योगस्तद्योगादृते (1/16)
हेतु मदनित्यमव्यापि सक्रियमनेकमाश्रितं लिंगम् (1,124)
प्रीत्यप्रीतिविषादाद्यैर्गुणानामन्योन्यं वैधर्म्यम् (1,129)
लध्वादिधर्मैः साधर्म्यं वैधर्म्य च गुणानाम् (1,128)
परिणामात्" (1,130)
शरीरादिव्यतिरिक्तः पुमान् (1,139)
जडप्रकाशाऽयोगात् प्रकाशः (1,145)
निर्गुणत्वान्न चिद्धर्मा (1,146)
जन्मादिव्यवस्थातः पुरूषबहुत्वम् (1,149)
साक्षात्सम्बन्धात् साक्षित्वम्" (1,161)

---

[1]साम र 101
[2]श्रीमद्भगवद्गीता 2/22

उपरागात् कर्तृत्वम्'' (1,164)
मातापितृजं स्थूलं प्रायश इतरन्न तथा (3/7)
पाञ्चभौतिको देहः'' (3/17)
स हि सर्ववित् सर्वकर्ता'' (3/56)
ईश्वरेश्वरसिद्धिः सिद्धा (3,57)
समाधिसुषुप्तिमोक्षेषु ब्रह्मरूपता'' (5,116)
देहादिव्यतिरिक्तौऽसौ वैचित्र्यात् (6,2)
जडव्यावृतो जडं प्रकाशयति चिद्रूपः (6,50)

अन्यान्यपि शास्त्राणि जडचेतनयोदेहदोहिनो वैधर्म्य प्रायश एतद्विधया वर्णयन्ति यथास्वप्रस्थानानुकूलम्, शास्त्राध्ययनं शास्त्रज्ञगुरूसेवनं च सर्वत्र विवेकेऽपेक्षितम्।

**चिद्रूपः** – चेतयितृस्वरूपः चित्, चिती-चिति संज्ञाने चेतति, भानार्थक धर्मि चित्, तान्तं भानस्वरूप ज्ञानं रूपम्, तादात्म्येन रूप्यते चिता स आत्मा, ज्ञानेन ज्ञानी निरूप्यते, लक्ष्यते, चित्ज्ञानं चैतन्यं रूपं लक्षणं यस्य सः चिद्रूपो, ज्ञानवान् ज्ञान धर्मभूत द्रव्यगुणात्मकं तद्वान्, चिद्धर्मि ज्ञानं धर्म इति भेदेनोपन्यासः चित्, स्वरूपभानार्थं ज्ञानवान् धर्मभानार्थम्, नित्यज्ञानमात्मा परब्रह्माऽऽनन्दघनः, नित्यचिदात्मा जीवात्मादि., नित्यप्रत्यक्षदर्शी परमात्मा करणनिरपेक्षत्वात्, आनखाग्रशिखाग्रं शरीरे प्रविष्टो जीवात्मा।

समेषा चार्वाका मननिरासाय युक्तित्रयात्र ज्ञातव्या यत्र प्रथमा युक्ति वर्तते यत् आत्मा रूपा अहमर्थ् मित्याकारेण प्रतीयत। | ६

काणादा हि ज्ञातारमपि जीवमात्ममनः संयोगादिसामग्रीविरहदशायां पाषाणतोऽविशिष्टमेव मन्यन्ते तन्निरसनाय चिद्रूप इति प्रतिपादितम्, अनेन आगन्तुकचैतन्यगुणकं स्वतः पाषाणकल्पमेव जीवमभ्युपगच्छन्तः ते प्रत्युक्ताः, आह च श्रुतिः [1]ज्ञानस्वरूपता विज्ञानात्मा सह देवैश्च [2]विज्ञानात्मा यथा देहे जाग्रत्स्वप्नसुषुप्तितः [3]विज्ञातारमरेकेन विजानीयात् इत्यादिभिः श्रोतैः स्वयं प्रकाशस्वभावतोक्ता जीवात्मनः।

स्वयं प्रकाशत्वमप्यात्मनः निम्नांकितैश्रौतवाक्यैर्भवति प्रतिपादितं जीवात्मनः [4]"अत्रायं पुरूषः स्वयं ज्योतिर्भवति'' स्वयंप्रकाशत्वाच्च श्रुतौ निर्दिष्टः जीवो विज्ञान शब्देन- [5]विज्ञानं यज्ञं तनुते [6]विज्ञानं भगवो विजिज्ञासे [1]विज्ञानं वाव ध्यानात्भूयः इत्यादिका।

[1] प्रश्नोपनिषत् 8/11
[2] महानारायणोपनिषत् 17/12
[3] बृहदारण्यकोपनिषत् 2/4/14
[4] बृहदारण्यकोपनिषत् 4/3/9, 14
[5] तैत्तिरीयोपनिषद् 2/5
[6] छान्दोग्योपनिषत् 7/17/1

---

यद्यप्यात्मनोऽणुत्वशेषत्वनियाम्यत्वनित्यत्वादयो धर्मास्तथापि न तैराकारैरात्मस्वरूपस्य स्वयं प्रकाशता तेषां मानान्तरावसेयत्वात्, ज्ञानस्वरूपास्यधर्मिस्वरूपमात्रावगाहित्येनाहमिति स्वयंप्रकाशता, अहमिति सदा प्रकाशमानमात्मस्वरूपं प्रत्यक्त्वेनैकत्वेन च प्रकाशत इति।

**ज्ञानाश्रय: ज्ञानवान् वा –** आत्मा न केवलं ज्ञानस्वरूप· किन्तु ज्ञानाश्रयश्च इति प्रतिपादनाय ज्ञाता शब्दस्य प्रयोग: कृत: भगवता स्वामिनारायणेन शिक्षापत्र्या जीवलक्षणं [2] हृत्स्थोऽणुसूक्ष्मचिद्रूपो ज्ञाता व्याप्याखिलां तनुम्, ज्ञानशक्त्या स्थितो जीवो ज्ञेयोऽच्छेद्यादिलक्षणै: यो ज्ञाता भवति स: कर्तापि भवति श्रुतौ हि ज्ञातृत्वस्य कर्तृत्वस्य चास्य वर्णनं समुपलभ्यते यथा- "अथ यो वेदेदं जिघ्राणाति स आत्मा" [3] एष हि द्रष्टास्प्रष्टाश्रोताध्रातारसयितामन्ताबोद्धाकर्ता विज्ञानात्मा पुरूष· [4] एवमेवास्य परिद्रष्टुरिमा षोडशकला: पुरूषायणा: "न विज्ञातुर्विज्ञातेविपरिलोपो विद्यते" [5] मनसैवैतान् कामान् पश्यन् रमते [6] न पश्यो मृत्युं पश्यति, ज्ञानं हि नाम "स्वसत्तामात्रेण स्वाश्रय प्रति स्वपरव्यवहारहेतुरात्मधर्म:" यथा प्रकाश स्वरूपाया: प्रभाया· प्रकाशस्वरूपा· मणिद्युमणिप्रदीपा आश्रया भवन्ति तथैव ज्ञानस्वरूप आत्मा ज्ञानस्याश्रयो भवति, अस्मिन् विषये तत्वत्रयटीकाकारा: डॉ शिवप्रसादद्विवेदीमहोदया: लिखति यत्- [7] ज्ञानस्वरूपस्यात्मनो धर्मभूत ज्ञानं प्रदीपादीनां प्रभावदपृथक्सिद्धो धर्म:, अपृथक्सिद्धत्वं च धर्मिण पृथक् स्थित्युपलब्ध्यनर्हत्वम्, अत एवात्मानं विना ज्ञानं नोपलभ्यते क्वचित्,

विज्ञानात्मवादिनो योगाचारा: निर्विशेषाद्वैतवादिनश्च ज्ञानमार्गस्यैवात्मत्व स्वीकुर्वन्ति तेषांमतं खण्डयन् लोकाचार्याह तत्व त्रये- "आत्मा ज्ञानाधारो यदि न स्यात् ज्ञानमात्रमेव च स्यात्, तदा ज्ञानमहमिति वक्तव्यं स्यान्न तु जानान्यहमिति। अस्य व्याख्यानावसरे प्रतिपादितम् डॉ, शिवप्रसादद्विवेदीमहोदयै: यत् -

"किञ्च व्यवहारमात्रं ज्ञातृज्ञेयज्ञानसापेक्षं प्रवर्तते, येन प्रकारेण व्यवहार व्यवहर्तारं चानपेक्ष्य स्वसत्तां न लभते तथैव विज्ञातारं विज्ञेयं चानपेक्ष्य विज्ञानं न जायते अत एव विज्ञानाद् भिद्यते विज्ञाता।

न च ज्ञानमात्रमेव सत्यं तदेवात्मा, तद्व्यतिरिक्तो विज्ञाता .मिथ्या विज्ञानेनसहैवोपलम्भात् यदि विज्ञानाद्भिन्नो विज्ञाताऽपिस्यात्, तदा तस्य विज्ञानात् पृथगप्युपलब्धिर्भवेत्, घटात् पृथक् स्थित्युपलब्धिवान् पटो यथा, यतो न ह्युपलभ्यते पृथक् विज्ञानात् विज्ञाता ततो ज्ञायते नास्ति विज्ञानातिरिक्तो विज्ञाता इति वाच्यम्, यतो हि-

---

[1] छान्दोग्योपनिषत् 7/7/1
[2] शिक्षापत्री-105
[3] प्रश्नोपनिषन् 4/9
[4] प्रश्नोपनिषन् 6/5
[5] छान्दोग्योपनिषत् 8/22/2
[6] मैत्रायण्युपनिषत् 7/11
[7] तत्वत्रयम् विश्वविद्यालयप्रकाशनकेन्द्रप्रकाशितम् पृष्ठे 53

सहोपलम्भनियमादेव विज्ञातृविज्ञानयो: सिद्धयति भेद:, भिन्नयोरेव सह शब्दस्य प्रयोगदृश्यते पुत्रेण सहागत: पिता इत्यादौ।

किञ्च-सिद्धिमिव ज्ञानं हि आश्रयसापेक्षं भवति, नहि लोके वेदे वा अकर्तृकमकर्मकं वा ज्ञानमुपलभ्यते अत एव ज्ञानव्यतिरिक्तो ज्ञानाश्रय आत्मेति सिद्धयति।''

**आत्मनो नित्यत्वम्** - अजन्य. प्रागभावध्वंसान्यतराऽप्रतियोगीसनातनस्वरूप। [1] नित्यो नित्यानां चेतनश्चेतनानाम् एको बहूनां यो विदधाति कामान् इत्यादिश्रुतिविधानात्।

**आत्मनो निर्विकारत्वम्** — बीजजन्मवृद्धिपरिणामह्रासक्षयात्मकषड्विकार रहितोभवत्यात्मा।

**आत्मा निर्मल:** — मलं माया, तमो, कर्म भ्रान्तिर्वासना, निरूपाख्यता, जाड्यं, देहाद्यामलानि नाऽऽत्मस्वरूपमेतदेकमपि, द्रव्ययोगेऽपि, 'स एव स:' इति न स्वरूप मलं अतोऽमलो निर्मल:।

व्यापक:- व्याप्यसापेक्षो व्यापक:, व्याप्तं शरीरं व्याप्तिमत्, व्याप्तिरपि नाभावसम्बन्धा, जीवसत्वे जीवनं जीवाभावे जीवनाभाव:, सम्बन्ध:, समानाधिकरण्यम्।

"यथा प्रकाशयत्येक: कृत्स्नं लोकमिमं रवि:।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत।।''

"द्वासप्तति: सहस्त्राणि हृदयादभिनि:सृता:।
हिताहिता नाम नाड्यस्तासा मध्ये शशिप्रभम्।।
मण्डलं तस्य मध्यस्थ आत्मा दीप इवाचल.।''

"स्वरूपतोऽणुभूतोऽपि प्रकाशेन शरीरग ।
एकदेशस्थितो वेत्ति, हरिचन्दनबिन्दुवत्।।''

"प्रभया भस्करो यद् वद् ब्रह्माण्डं व्याप्यतिष्ठति।
एकदेश स्थितो दीप: कृत्स्नं गेहं प्रकाशते।।''
इत्याद्यनेकैस्स्मृतिवचनै: ज्ञायते यत् आत्मा व्यापक: इति।

**अनेकजीववाद** — (जीवाद्वैतवादिन. प्रतिपादयन्ति यत् - अविद्योपहित चैतन्यमेव जीव: स चैक एव, स्वापकाले सुप्तेन पुरूषेण दृश्यमाणस्वाप्निकजगद्वदखिलमिदं जगत् एव पश्यति, तथा चाहु: एकमेवशरीरं जीववन्निजीर्वानीतराणिशरीराणि, तच्छरीर किमिति न व्यवस्थितम्,

---

[1] गुह्यकाल्युपनिषत् 7।

प्रतिपाद्यमानाद्वैतं द्विविद्यम्- ब्रह्माद्वैतं जीवाद्वैतं च, ब्रह्मद्वैतं हि प्रकार्यद्वैतम्, जीवाद्वैतं हि प्रकाराद्वैतम्, किन्तु [1]'सर्वं खल्विदं ब्रह्म ,[2]ऐतदात्म्यमिदं सर्वं, [3]पुरूष एवेदं सर्वम् इमानि समानाधिकरण्यवाक्यानि ब्रह्माद्वेतस्यैव प्रतिपादनं कुर्वन्ति न तु प्रकाराद्वैतस्य [4]एकस्मिन् बहुधाविचचार इति श्रुत्या प्रकारबहुत्वस्य कण्ठोक्तेः न च 'नेह नानास्ति किञ्चन' इति श्रुतिरेव भेदं निषेधतीति वाच्यम्, तस्याः श्रुतेः विहितब्रह्मात्मकत्वविरोधिभेदविषयकत्वात्, 'न तत्समश्चाभ्यधिकश्च दृश्यते' इति श्रुतिः तुल्यप्रकारान्तर्यनिषेधद्वारेण ब्रह्माद्वैतमेव प्रतिपादयति, जीवबहुत्वस्योकाराभावे बद्धमुक्तादिव्यवस्था सुखादिव्यवस्था उपदेशश्च नोपपद्यन्ते।

[5]पुमान्नदेवो न नरो न पशुर्न च पादपः।
वतुर्विद्यो विभेदोऽयं मिथ्याज्ञाननिबन्धनः।।

देवादिभेदेऽपध्वस्ते' इत्यादिकानि वाक्यानप्यौपाधिकमेव भेदं निषेधयन्ति न तु स्वरूपकृतम्, इदं शास्त्रोक्तमद्वैतमजानन्त एव अद्वैति आत्मभेदं नास्तीति वदन्ति। पिल्लै लोकाचार्याणां मते तु "तथा सति कस्मिंश्चित् सुखमनुभवति तदानीमेवान्यस्य दुःखानुभवो नोपपद्येत, देहभेदात् तदिति चेत् सौभरिशरीरेप्येवं स्यात्, कस्यचित् संसरणं कस्यचिन्मुक्तिः कस्यचिच्छिष्यत्वं कस्यचिदाचार्यत्वं च न संघटेत्, विषमसृष्टिरपि नोपपद्येत, आत्मभेद प्रतिपादकश्रुति [6]नित्योनित्यानां चेतनश्चेतनानाम् इत्यादिकाः विरोधश्च, श्रुतिरौपाधिकभेदं प्रतिपादयति इति चेत् न, मोक्षदशायामपि भेदसद्भावात्, तदानीं देवमनुष्यादिभेदानां च निवृत्तावात्मनां स्वरूपस्यात्यन्तसमतया केनापि प्रकारेण भेदकथनायोगत्वेऽपि परिमाण गुरूत्वाकाराणां साम्येऽपि स्वर्णकलशरत्नब्रीह्यादीनां परस्परभेदवत् स्वरूपभेदोऽपि सिद्धः तस्मादात्मभेदोऽङ्गीकार्यः।)

**अणुत्वम्**— स्वकर्मफलभोक्ता जीवः उत्क्रमणद्वारा शरीरान्तरं प्राप्नोति, तदुत्क्रमणमपि श्रुतिसिद्धम् यथा प्रद्योतेनैव आत्मा निष्क्रामति चक्षुषा वा मुर्ध्ना वा अन्येभ्यो वा शरीरदेशेभ्यः इति श्रुतिः शरीरदेशादुत्क्रमणं [7]"ये वै के चास्माल्लोकात् प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति" इति श्रुतिः शरीरदुत्क्रान्तानां जीवानां चन्द्रादिलोकेषु गमनं, 'तस्माल्लोकात् पुनरेत्वस्मै लोकाय कर्मणे' इति श्रुतिः चन्द्रादिलोकेभ्यः मर्त्यलोकागमन च प्रतिपादयति। शरीराच्छरीरान्तरं प्रापको जीवः अणुपरिमाणक एव अन्यथोत्क्रमणासम्भवात्, पिपीलिकादिलघुतमशरीरान्तवर्तित्वं चासंभवात्, अत एव जीवस्याणुत्वं स्वीक्रियते, श्रुतिरपि

---

[1] छान्दोग्योपनिषत् - 3/14/1
[2] छान्दोग्योपनिषन- 6/8/7 + 6/9/4 + 6/10/3 + 6/11/3 + 6/13/3
[3] पुरूषसूक्तम्-4
[4] चित्युपनिषद् 1/1
[5] विष्णुपुराण 2/13/98
[6] गुह्यकाल्योपनिषन 71
[7] कौषितकिब्राह्म 1/2

कण्ठतः जीवस्याणुत्वपरिमाणं प्रतिपादयति यथा- [1] 'एषोऽणुरात्माचेतसा वेदितव्य' [2] बालाग्रशतभागस्य, शतधाकल्पितस्य च। भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते [3] आराग्रमात्रो ह्यवरोऽपि दृष्टः इत्यादिभिः, आत्मानां विभुत्वेन मन्यमानाः तार्किका अत्र वदन्ति-

ननु- [4] योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरूषः स समानः इति जीव प्रस्तुत्य ''महानज आत्मेति'' महत्वश्रुतेर्नाणुजीवः किन्तु विभुरेव, स्मर्यते च- 'अविनाशि तु तद्विद्धि येन सर्वमिदंततम्' 'अच्छेद्योऽयमदाह्योऽयमक्लेद्यो शोष्य एव च, नित्य सर्वगत इत्यादि। मैवम्, सर्वगतत्ववचनानां ''वायुः सर्वत्रगो महा ''नित्यादाविवान्यथासिद्धत्वात्, नहि तत्रैकस्य वायुव्यक्तेः सर्वगतत्वं प्रत्याप्यते, वायुत्वं जातीयेनानाक्रान्तः प्रदेशो नास्तीत्येतावदेव, तदवदिहापि सर्वभूतजातमात्मत्वजातीयेन व्याप्तमित्येव प्रत्याय्यते, ''स वा एष महानज आत्मे'' त्येतत्तु परमात्मानमधिकृत्य प्रवृत्तम्, 'योऽयं विज्ञानमयः प्राणेष्विति' सत्यप्युपक्रमे जीवप्रस्तावे मध्ये 'यस्यानुविद्धः प्रतिबुद्ध आत्मेति' परमात्मनः प्रस्तुतत्वात्, विभुत्वे तस्योत्क्रान्तिगत्यागतयः श्रुतौ श्रूयमाणा व्याहन्येरन्, न च प्राणवायुगतं शरीरादुत्क्रमणं प्राणविशिष्टै तस्मिन्नुपचर्यत इति न तस्य विभुत्वव्याघात इति वाच्यम्, प्राणोत्क्रमणस्यापि जीवोत्क्रमणजन्यत्वप्रतिपादिकायाः [5] ''तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्त सर्वे प्राणा अनूत्क्रामन्ति'' इत्यादिश्रुतेर्विरोधापत्तेः, अनुर्ह्यत्र 'यज्ञमनु प्रावर्ष' दित्यत्रेव हेतुत्वपर, 'अनुर्लक्षण' इति सूत्रे लक्षणपद च कारकहेतुपरम्, कथञ्चिदौपचारिकत्वाश्रयणेनोत्क्रान्तिश्रुति नयनेऽपि गत्यागतिश्रुतयस्तु कथञ्चिदपि न संगच्छन्ते श्रूयते चाणुत्वं व्यक्तम्- 'एषोऽणुरात्मा चेतसा वेदितव्यः' इति। न च महानप्यात्मा चेतसोपाधिनाऽणुर्वेदितव्य इति तदर्थ, अन्वयस्वारस्यभंगात्, चेतसावेदितव्य इत्येवप्रकारेणैव ह्यन्वयः स्वरसः न चायमणुत्वनिर्देशो न मानविशेषप्रमापकः, दुर्ज्ञेयत्वपर्यवसितसूक्ष्मत्वपरतयाऽन्यथासिद्धेरिति वाच्यम् 'आराग्रमात्रो' 'बालाग्रशत,' इत्यादिभिर्मानविशेषपरानन्यथासिद्ध वचनैकार्थ्यात्, आह च सूत्रकारो जीवस्याणुत्वम् [6] 'उत्क्रान्तिगत्यागतीनाम्' [7] 'स्वात्मनाचोत्तरयोः' [8] 'नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात्' [9] 'स्वशब्दोन्मानाभ्यां च' इत्यादिषु। अणुत्वेऽप्यात्मनो धर्मभूतज्ञान प्रसरणतः सर्वावयपावच्छेदेन सुखाद्यनुभव उपपद्यते, निरूपितं चैतत् प्रभादृष्टांतेन सूत्रकृता- [10] गुणाद्वाऽऽलोकवत् इति।

---

[1] मुण्डकोपनिषत् 3/1/9
[2] श्वेताश्वतरोपनिषत्- 5/9
[3] श्वेताश्वतरोपनिषत् 5/8
[4] बृहदारण्यकोपनिषत् 4/3/7
[5] बृहदारण्यकोपनिषन्- 6, 4, 2
[6] ब्रह्मसूत्र-2/3/20
[7] ब्रह्मसूत्र 2/3/21
[8] ब्रह्मसूत्र 2,3,22
[9] ब्रह्मसूत्र 2,3,23
[10] ब्रह्मसूत्र 2-3-26

परमात्मनियाम्यो जीवः धार्यः शेषभूतश्च-(जीवस्य कर्तृत्वं स्वतन्त्रं नास्ति, अपितु परायत्तमेव, प्रतिपादयन्ति हि श्रुतयो जीवस्य परमात्मायत्तं कर्तृत्वम्, तथाहि, [1]अन्तः प्रविष्ट शास्ता जनानां सर्वात्मा , [2]य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्मान्तर्याम्यमृतः इत्यादिका श्रुतयः [3]सर्वस्य चाहं हृदिसन्निविष्टः मत्तः स्मृतिर्ज्ञानमपोहनञ्च , [4]ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति। भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया इत्यादिका. स्मृतयश्च जीवस्य परमात्मपरतन्त्रं कर्तृत्व प्रतिपादयन्ति भगवान् बादरायणोऽपि [5]परात्तुतच्छ्रुते. सूत्रे एतत् सर्वं प्रत्यपीपदत्। ननु, जीवस्य परमात्माधीनकर्तृत्वे स्वीकृते तस्य विधिनिषेधशास्त्रवश्यत्वं नश्येदिति चेन्न [6]'कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धा वैयर्थ्यादिभ्यः' सूत्रस्य श्रीभाष्ये जीवस्य परमात्माधीनकर्तृकत्वम्, शास्त्रावैयर्थ्यं च सम्यगुपपादितत्वात्, तथा च श्रीभाष्यम-

'सर्वासु क्रियासु पुरूषेण कृतं प्रयत्नं उद्योगमपेक्षान्तर्यामी परमात्मा तदनुमतिदानेन प्रवर्तयति, परमात्मानमनुमति मन्तरेणास्य प्रवृत्तिनोपपद्यते इत्यर्थः, कुत एतत् विहितप्रतिषिद्धावैयर्थ्यादिभ्यः। आदिपदेनानुग्रहनिग्रहादयो गृह्यन्ते, यथा द्वयोः साधारणे घने परस्परत्वापादनमन्यतरानुमतिमन्तरेण नोपपद्यते, अथापीतरानुमतिः स्वेनैव कृतेति तत्फलं तस्यैव भवति।

नन्वेवं [7]एषह्येव साधुकर्मकारयति तं यमेभ्यो लोकेभ्य उन्निनीषति, एष एवासाधु कर्म कारयति तं यमधो निनीषति इत्युन्निनीषयाऽधोनिनीषया च स्वयमेव साध्वसाधुनी कर्मणि कारयतीत्येतन्नोपपद्यते। उच्यते- एतन्न सर्वसाधारणम् यस्त्वतिमात्रपुरूषानुकूल्ये व्यवसित. प्रवर्तते तमनुगृहणन् भगवान् स्वयमेव स्वप्राप्त्युपायेषुकल्याणेषु कर्मस्वेव रूचिं जनयति। यश्चातिमात्रप्रातिकूल्ये व्यवषितः प्रवर्तते तं विगृहणन् स्वप्राप्तिविरोधिष्वद्योगतिसाधनेषु कर्मसु रूचिं जनयति। यथोक्तं भगवता स्वयमेव [8]'अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते। इति मत्वा भजन्ते मां बुधाऽभावसमन्विताः' इत्यारभ्य [9]'तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्। ददामि बुद्धियोगं तं येन मामुपयान्ति ते।' तेषामेवानुकम्पार्थमहमज्ञानज तमः। नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता।। तथा [10]असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्।

---

[1] तैत्तिरीय आरण्यक 3/11/10
[2] बृहदारण्यकोपनिषन् 5/7/22
[3] श्रीमद्भगवद्गीता 15/15
[4] श्रीमद्भगवद्गीता 18/61
[5] शारीरक मीमांसा 2/3/40
[6] शारीरकमीमांसा 2/3/41
[7] कौषीतक्युपनिषत् 3/9
[8] गीता 10/8
[9] गीता 10/10-11
[10] गीता 16/8

---

इत्यादि [1]ममात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः इत्यन्तमुक्त्वा [2]तानहं द्विषत क्रूरान् संसारेषु नराधमान्। क्षिपाम्यजस्त्रमशुभानासुरीष्वेव योनिषु इत्युक्तम्।)

(नियाम्यत्वं नाम- ईश्वर बुद्ध्यधीन सर्वव्यापारिवत्वम्, य आत्मनि तिष्ठन्-----इत्याद्युक्तप्रकारेण परमात्मकत्वात् परमात्मेच्छाधीन सकलव्यापारवत्वात् परमात्मनो नियाम्योऽस्त्यात्मा। यथा शरीरस्य सर्वाः प्रवृत्तय आत्मेच्छाधीना भवन्ति तथैव परमात्मशरीरभूतस्य जीवस्यापि सर्वाः प्रवृत्तयः परमात्मेच्छाधीना भवन्ति-इत्यर्थ। परं च जडशरीरापेक्षया चेतनस्येदं वैलक्षण्यमस्ति यत् स्वाभाविकज्ञातृत्व भोक्तृत्वकर्तृत्वगुणसम्पन्नोऽयम् ज्ञानचिकीर्षाप्रयत्नप्रवृतिषु स्वयं समर्थोऽपि अन्तर्यामिणोऽनुमतिमवाप्यैव तेषु तेषु कर्मसु प्रवर्तते, परमात्माऽपि तस्य प्रथमां प्रवृत्तिं प्रेक्ष्यैव तथाकर्तुर्मनुमतिं ददाति, अत एव हि विधिनिषेधशास्त्राणामवैयर्थ्यम्।

धार्यत्वं नाम- तत्स्वरूप संकल्पव्यतिरेकनियत स्वसत्ताव्यतिरेकत्वम्, [3] 'एष सेतुर्विधारणः' [4]एतस्य चाक्षरस्य प्रशासने गार्गी सूर्याचन्द्रमसौ विधृतौ तिष्ठत इत्यादि वचासि चेतनाचेतनयोः समानरूपेण ईश्वर धार्यत्वं प्रतिपादयन्ति। इत्यमात्मापि परमात्मधार्यः। परमात्मव्यतिरिक्ता. हि चेतनं नहि धारयन्ति, धार्यरूपाखिलस्य मूल परमात्मन. स्वरूपं सकल्पश्च। एतयोरभावे जगता सत्ता भवितु नार्हति। परमात्मा स्वसत्यसंकल्पेनैव जगद्धत्ते। लोकेऽपि स्वरूपसंकल्पाभ्यो धार्यस्य सत्ता दृश्यते, यथा चात्मा स्वरूपसंकल्पाभ्यां शरीरं बिभर्ति तथैवायं परमात्मा स्वरूपनिरूपकधर्माणा निरूपितस्वरूपविशेषाणानां गुणानामिव स्वव्यतिरिक्त समस्तद्रव्याणामप्यव्यवधानेन स्वरूपेण धारको भवति तत् तत् द्रव्याश्रित गुणानां तत् तत् द्वारा धारको भवति, जीवैर्ध्रियमाणानां शरीराणां जीवद्वाराधारक इति केचिदाचार्याः वदन्ति। एव सर्वेषामप्याश्रयापेक्षयाऽपृथक्सिद्धविशेषणत्वादि तेषां सत्तादय आश्रय सत्ताधीना. सर्वभूताना सत्तायाः सकल्पाधीनत्वं नाम अनित्यानामनित्येच्छाधीनोत्पत्तिकत्वं नित्यानां नित्येच्छाधीन सिद्धिकत्वमित्याहुः श्रीमद्वरवरमुनिस्वामिनः। श्रीमद्यामुनाचार्यस्वामिन [5]नावेक्षसे यदि ततो भुवनान्यमुनि, नाल प्रभो भवितुमेव कुतः प्रवृत्तिः इति श्लोके तथा [6]प्रकृतिपुरूषकालव्यक्तमुक्ता यदिच्छामनुविदधति नित्यं नित्यसिद्धैरनैकैः इतिश्लोके चाहुः, श्रीकूरेशस्वामिनोऽपि [7] 'इच्छात एव तव विश्वपदार्थसत्ता' इति श्लोके चेयमर्थ

---

[1] गीता 16/18
[2] गीता 16/19
[3] बृहदारण्यकोपनिषत् 4/4/22
[4] बृहदारण्यकोपनिषत् 3/8/9
[5] स्तोत्ररत्नम्-10
[6] आत्मसिद्धि-1
[7] वैकुण्ठस्तव 36

समर्थयामासुः। [1]'द्यौः सचन्द्रार्क नक्षत्रा रवं दिशो भूर्महोदधिः। वासुदेवस्य वीर्येण विधृतानि महात्मनः।। इति स्मृतिरपि परमात्मसंकल्पायतां जगतः स्थितिं स्मरति।

शेषत्वं नाम चन्दनकुसुमताम्बुलादिवत् तस्य यथेष्टविनियोगार्हत्वम्। चन्दनकुसुमताम्बुलादिवत् इति दृष्टान्तः। यथेष्टविनियोगार्हत्वमितिलक्षणम्, यथेष्टविनियोगार्हत्वं नाम शेषी यथा वाञ्छति तथा विनियोगस्य योग्यतायुक्तत्वम्, अत्र विनियुज्यमानस्य स्वार्थलेशोऽपि नहि भवति। उदाहरणञ्चात्र- चन्दनकुसुमताम्बुलादीनाम्। एतेषां विनियोगे स्वार्थं लेशोऽपि नहि भवति लिम्पतो दधतो भुजञ्त एव तस्मिन् विनियोगे स्वार्थः। अत्रादिपदेन शरीरग्रहणम्, तेषु तेषु कर्मसु शरीरस्यापि प्रवृत्तिः आत्मनो भोगाय एव भवति। तथैवायमात्माऽपि केवलं परमात्मनः लीलायै भवति। स्वकीयमपरमात्मशेषत्वं प्रकटयन्त सूरयः ऊचुः 'स्वार्थमेव मां स्वीकुरू' इति, भाष्यकारैः श्रीमद्रामानुजायैरप्युक्तम्- परगतातिशयाधानेच्छयैवोपादेयत्वमेव तस्य स्वरूपम् सः शेषः परः शेषी, इति अभियुक्ता अप्यवदन्-

यथेष्टविनियोगार्हः शेषशब्देन कथ्यते।
ईश्वरेण जगत्सर्वं यथेष्टं विनियुज्यते।।

शेषस्य शेषत्वं व्याकुर्वद्भिः श्रीमद्यामुनाचार्यस्वामिभिरूक्तम्-

निवासशय्यासनपादुकांशुकोपधानवर्षातप वारणादिभिः।
शरीर भेदैस्तव शेषतां गतैर्यथोचितं शेष इतीरितं जनै ।।

जीवस्य परमात्मशेषत्वं प्रतिपदयन्ति हि शास्त्राणि यथा [2]'पतिं विश्वस्यात्मेश्वरम्' [3]यस्यात्मा शरीरम् इत्यादिकाः श्रुतयः, [4]ज्ञानानन्दमयस्त्वात्मा शेषो हि परमात्मनः। परवानस्मिकाकुत्स्य त्वयि वर्षशतं स्थिते।। [5]दासोऽहं कोसलेन्द्रस्य, रामस्याक्लिष्टकर्मणः दासभूताः स्वतः सर्वे ह्यात्मनः परमात्मनः। नान्यथा लक्षणं तेषां बन्धे मोक्षे तथैव च।। स्वोज्जीवनेच्छा यदि ते स्वसत्तायां स्पृहा यदि। आत्मदास्यं हरेस्स्वाम्यं स्वभावं च सदा स्मर।। इमानि सर्वाणि वाक्यानि जीवस्य परमात्मशेषत्वं प्रतिपादयन्ति। शेषभूतानां वस्तूनां स्थितिः पृथक्त्व सिद्धरूपादपृथक्सिद्धत्वरूपेति द्वेधा भवति, येषां शेषिणा सदैवस्थिति उपलब्धिः सिद्धिश्च भवति तेऽपृथक्सिद्धाः, ये तथा न भवन्ति ते पृथक्सिद्धाः, देहो हि आत्मना सहैव सिद्ध्यति उपलभ्यते च, आत्मन वीक्षा क्षणमप्यविकृतं न हि तिष्ठति देहत्यागं समकालादेव तस्मिन् विकारः प्रारभ्यते। अत एवायमात्मानः अपृथक् सिद्धः शेषोऽयम्। गृहादिकमपि

[1] विष्णुसहस्त्रनाम
[2] महानारायणोपनिषत्- 9/3
[3] श प 14/5/30
[4] वाल्मीकीयरामायण- अरण्यकाण्ड 15/9
[5] वा रामायण-सुन्दरकाण्ड 43/9

आत्मन. शेषभूतम्। अथापि तेषां आत्मन: पृथक् भवति स्थित्यादिकम् अत एव तत्पृथक्सिद्धमिति कथ्यते। भगवान् स्वामिनारायणोऽपि हरिवाक्यसुधासिन्धौ विषयकचर्चाया प्रकृष्टरूपेण पारतन्त्र्यमेव प्रतिपादयति जीवानां यथा-

[1]पृथव्यंत.स्थ बीजानि, यथामेघाम्बु योगत·।
उद्गच्छन्ति तथा जीवा. मायया ब्रह्म योगत:।।
सर्वेषामुद्गमे स्थाने तिरोभावे च सर्वथा।
इच्छैव परमेशस्य, मुख्यो हेतुरितीयताम्।।
नित्यसिद्धा एव जीवा मायायां सन्ति सर्वश.।
पृथिव्यामिव बीजानि तेनोद्गच्छन्ति नूतना:।।
ईश्वरस्याक्षरत्वाच्च न तदंशाश्च ते मता:।
परमेश्वर एकोऽस्ति सर्वेषां तु नियामका।।

## त्रिविधमात्मस्वरूपम्

आत्मस्वरूपं च बद्धमुक्तनित्यभेदेन त्रिविधम्, संसारिणो बद्धा इत्युच्यन्ते।अर्थात् प्रकृते· संबन्धं जाते सति जीव: ससरति, तत: स पुण्यपापादिक कर्म करोति तेनैव कर्मणा जीवस्य [2]'एष आत्माऽपहतपाप्माविजरोविमृत्यु रविशोकोऽविजिघत्सोऽपिपास. सत्यकाम सत्यसंकल्प:' इति श्रुत्युक्तं स्वाभाविक स्वरूपं तिरोधीयते तेन संकुचित ज्ञानवान्स क्लेशकर्मविपाकाशयैर्दूषितान्त:करण: पूर्वकृत कर्मपरिपाकरूपं सुखदु:खादिकमनुभवति। प्रकृतेस्संसर्गादेव स: अनात्मन्यात्मबुद्धिमस्वेस्वमतिं च करोति, प्रकृतिसंसर्गजन्य: संसार: तज्जन्यै: कर्मभिर्देह सम्बन्ध: तस्माद् मिथ्याज्ञानं तस्मात् कर्माणि तैश्च देहसम्बन्ध· इति चक्रवत् सदा परिवर्तमान:। [3]समाने वृक्षे पुरूषो निमग्नोऽनीशया शोचति मुह्यमान: [4]द्वासुपर्णा सयुजा सखाया समानं वृक्षं परिषष्वजाते। तयोरन्य: पिप्पलं स्वादवत्यनश्नन् इत्यादिषु श्रुतिषु जीवस्य बद्धावस्था वर्णिता, बद्धोजीव: स्वकृतपुण्यपापरूपकर्मानुसारेणैव विविधविचित्रसाध्वसाधुरूपां योनिमधिगच्छति, तथा च श्रुति: [5]'साधुकारीसाधुर्भवति पापकारी पापो भवति, पुण्य: पुण्येन कर्मणा पाप: पापेन' [6]'तद् य इह रमणीय चरणा. अभ्यासो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं क्षत्रिययोनिं वैश्ययोनिं वा अथ य इह कपूयचरणा अभ्यासो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं वा चाण्डालयोनिं वा इत्यादिका: बद्धजीवैर्गृह्यमाणं शरीरं देव-तिर्यक्-मनुष्य-स्थावर भेदेन, जरायुजाण्डजस्वेदजोद्भिजभेदेन वा चतुर्धा भवति। उच्छिन्नसंसारबंधना मुक्ता इत्युच्यन्ते।

---

[1] श्रीहरिवाक्यसुधासिन्धु: त 233 श्लो 30-33
[2] छान्दोग्योपनिषत् 8/1/5
[3] मुण्डकोपनिषत् 3/1/2
[4] श्वेताश्वतरोपनिषत् 4/6
[5] बृहदारण्यकोपनिषत्- 4/4/5
[6] छान्दोग्योपनिषत् 5/10/7

मुक्तत्वं नाम प्रकृतिसंसर्ग प्रध्वंसाभाववत्वम्, अयमाशय: [1]'परीक्ष्यलोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात्' इत्यादि श्रुत्यनुसारेण ताप त्रयाभितप्तो जन: यदा संसारान्निर्विण्णो भवति तदा सत्सन्तान प्रसूतसदाचारनिष्ठवेदविदाचार्यस्य सविधे गत्वा श्रवणादि द्वारा-

प्राप्यस्य ब्रह्मणो रूपं, प्राप्तुश्च प्रत्यगात्मन:।
प्राप्त्युपायं फलं प्राप्तेस्तथा प्राप्तिविरोधी च।।

इति सच्छास्त्ररीत्याऽर्थपंचकविज्ञानेनात्मपरमात्मस्वरूपं ज्ञात्वा भगवत्प्राप्तिरूपं मोक्षस्यावाप्तये तैलधारावदवच्छिन्नस्मृति सन्तानरूपां सांगां भक्तिम्-

आनुकूल्यस्य संकल्प: प्रातिकूल्यस्य वर्जनम्।
रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथा।।
आत्मनि:क्षेप कार्पण्यषड्विद्या शरणागति:।

इत्युक्तरीत्या प्रपत्तिंस्वीकृत्य एतच्छरीरावसाने प्रारब्धकर्मजन्यशरीरावसाने वा शुषुम्णा नाड्या निर्गत्य तैस्तैरतिवाहिकै: तेषु तेषु लोकेषु नीत: तत्र तत्र पूजित: सन् सीमान्त सिन्धुं तीर्त्वा श्रीभगवद्धाममुपेत्य आविर्भूतगुणाष्टक: भगवच्चरणपरिचरणैकभोगो जीवो मुक्त:।

कदाप्यताप्रातसंसारा. नित्या इत्युच्यन्ते- अर्थात्- प्रकृतिसंसर्गात्यन्ताभाववन्तो जीव नित्यशब्देनोच्यते। ते च धामस्थ राधालक्ष्म्यादय:, तथाहि 'तद्विष्णो: परमं पदं सदा पश्यन्ति सूरय:' [2]यत्र पूर्वे साध्या: सन्ति देवा: इत्यादिषु श्रुतिषु 'वैकुण्ठे तु परे लोके नित्यत्वेन व्यवस्थिता:। पश्यन्ति च सदा देवं नेत्रैर्ज्ञानेन चामरा.।। इत्यादिका स्मृतयश्च नित्यान् वर्णयन्ति। जलस्याग्निसंसृष्टस्थाली संसर्गेण औष्ण्यशब्दाद्युत्पत्तिवदात्मनोऽप्यचित् सम्बन्धेनाविद्याकर्मवासना रूच्युत्पत्तिर्भवति, कारण निवृत्तौ सत्यां कार्यनिवृत्तिरिति नियमान् अचित् सम्बन्ध समाप्तौ दोषसमाप्ति: अचित् संबन्धनिवृत्तिश्च मुक्तेरव्यवहितप्राक्क्षणावच्छेदेन हि जायते। तदात्वे जीव आविर्भूतगुणाष्टको भवति तथा च श्रुति' [3]एवमे वैष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय स्वेन रूपेणाभिनिष्पद्यते' वार्तमितामेव प्रतिपादितवान् भगवान् स्वामिनारायण: तद्यथा-

[4]'यदा ते शरणं गत्वा, साक्षात्तं सर्वकारणम्।
स्वधर्मज्ञानवैराग्ययुजा भक्त्या भजन्ति च।।
तदैव तीर्त्वा तन्मायां ज्ञानिभक्तास्तु ते द्विज।

[1] मुण्डकोपनिषत् 1/2/12
[2] पुरूषसूक्तम्-16
[3] छान्दोग्योपनिषत् 8/11/2
[4] श्रीहरिवाक्यसुधासिन्धु त 233 श्लो 34-39

समानत्वं प्रयान्त्येव नारदर्षि शुकादिभिः।।
ब्रह्मीभूताश्च ते गत्वा, देहान्ते कृष्णधाम वै।
पार्षदत्वं भगवतो यायुः सिद्धान्त एष नः।।'

भगवत्श्रीस्वामिनारायणाभिमत जीवस्य रूपनिरूपणं डॉ शिवप्रसाद द्विवेदी महाभागा तत्वत्रयग्रन्थस्य भूमिकायां निम्नांकित प्रकारेण निरूपयन्ति-

आत्मनः स्वरूपं प्रतिपादयन्तः श्रीलोकाचार्यस्वामिनः प्राहुः- 'आत्मस्वरूपम्- 'शेन्नु शेन्नु परम्परमाय' इत्युक्तप्रकारेण देहेन्द्रियमनः प्राणबुद्धि . विलक्षणम्- अजडमानन्दरूपं नित्यमणुमव्यक्तमचिन्त्यं निरवयवं निर्विकारं ज्ञानाश्रयभूतमीश्वरस्य नियाम्यं धार्य शेषभूतं च।' अस्मिन् लक्षणे विलक्षणमित्यन्तं परमतं निरस्य स्वमतानुसारेण अजडमारभ्य शेषभूतञ्चेति पर्यन्तमात्मलक्षणं चकार, तत्र देहेन्द्रियमनःप्राणबुद्धिविलक्षणमिति पदेन ग्रन्थकार देहात्मवादिना- इन्द्रियात्मवादिनां मन आत्मवादिनां प्राणात्मवादिनां च चार्वाकाणा ज्ञानात्मवादिनां बौद्धाना निर्विशेषाद्वैतिनां च मत निराचकार। एतेषां मतानां खण्डनं 'आत्मसिद्धि' ग्रन्थे- सविस्तरं कृतं श्रीमद्यामुनाचार्य स्वामिभिः, परं च ग्रन्थकार ग्रन्थविस्तारभिया तदपहाय काश्चन नवीनायुक्तीः प्रस्तौषीत् याभिः तेषा सर्वेषा पूर्वपक्षिणां मतसमकालमेव निराकृतं भवति। ताश्च युक्तय निम्नांकिता सन्ति -

1 ममदेहः, ममेन्द्रियाणि, ममनः, ममप्राणा., मम ज्ञानमित्यादिषु प्रतीतिषु ममेति पदेनात्मानां परामृश्य तत्संबन्धित्वेन देहादिकमनुभवति लोक., संबन्धस्य च भिन्ननिष्ठतया भिद्यते देहादिभ्य आत्मा।

2. इत्थमेव सर्वासु प्रतीतिषु देहादिकमिदमा परामृश्यते, आत्मा च सर्वत्राहमेतीदंकारगोचराद्देहादिकाद् भिद्यतेऽहंकार गोचरआत्मा।

3 देहादयः सर्वदा नहि भासन्ते, तथाहि देहस्य स्वापादिकाले नहि भवति प्रतीतिः, अथवा- अनित्यत्वादेव देहः अतीतानागनकालयो व्यक्तत्वादेवनोपलम्भते, इन्द्रियाण्यपि आन्ध्यबाधियोदौ नोपलभ्यन्ते, संकल्पविकल्पसाधनं मन अपि तथैव मूढावस्थायां नो भासते, प्राणाऽपि मूर्च्छादौ नोपलभ्यन्ते, परञ्चात्मास्तु नित्यत्वादेवैतेषु नोपलभ्यमानेष्वपि सर्वदोषलभ्यते इति भिद्यते देहादिभ्य आत्मा।

4 एवमेव देहादय अनेके सन्ति तद्यथा अवयवसंघातरूपत्वाद् देहा अनेके 'चक्षु.-श्रोत्रादी नीन्द्रियाण्यपिनैकानि, मन अपि चित्तादि भेदेनानेकप्रकारक, प्राणापानादिभेदेन प्राणा अपि अनेके, ज्ञानमपि प्रत्यक्षादिभेदेन नैकप्रकारकमिति भिद्यतेऽनेकेभ्य देहादिभ्य एक आत्मा, सोऽयमात्मा स्वयंप्रकाशत्वादजडः, सुखस्वरूप, नित्य., अणुपरिमाणक, इन्द्रियातीतत्वादव्यक्तः, अचिद्विसजातीयतया अचिन्त्य., षड्पार्श्वरहितत्वान्निरवयवः, निर्विकारः, परमात्मन· शरीरभूतत्वात्तस्य धार्यः, शेषो नियाम्यश्च भवति।

अस्य लक्षणस्य मूलं हि भगवत्पादयामुनाचार्येणोक्तम् [1]देहेन्द्रियमनःप्राणधीभ्योऽन्योऽनन्यलक्षणः नित्यो व्यापी प्रतिक्षेत्रमात्मा भिन्नः स्वत. सुखी।। इति लक्षणं वर्तते, परंचेदं लक्षणमतीवविस्तृतमिति मत्वा ग्रन्थकारेण 'शेषत्वे सति ज्ञातृत्वमात्मनो लक्षणम्' इति निष्कृष्टम् लक्षणमुक्तम्।

## नैयायिकमतशोधनम् –

नैयायिकाः आत्मनः परिमाणविषये विवदन्ते, ते आत्मनः परिमाणं विभु स्वीकुर्वन्ति, आत्मनो विभुत्वं खण्डयन् ग्रन्थकारा वदन्ति यत्- यदि आत्मा विभुः स्यात्, तर्हि आत्मनः हृदयवर्तित्वस्य, लोकान्तरगमनस्य, लोकान्तरादागमनस्य, उत्क्रमणस्य च प्रतिपादिकाः श्रुतयो बाध्येरन्। तथाहि- [2]'हृदि ह्येष आत्मा' इति श्रुतिर्जीवस्य। हृदिवर्तित्वम्, [3]'प्रद्योतेनैव आत्मा निष्क्रामति चक्षुषा वा, मूर्ध्नो वा, अन्येभ्यो वा शरीरदेशेभ्य.' इति श्रुतिः जीवस्य अस्माच्छरीरादुत्क्रमणम्, [4]'ये व के चास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति' प्रभृतयश्श्रुतयो जीवस्य चन्द्रादिलोकेषु गमनं, [5]'तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मणे' इत्यादिकाः श्रुतयो जीवस्य लोकान्तरादागमनं च प्रतिपादयन्ति।

यदि आत्मा विभुः स्यात्, तर्हि आत्मनः सर्वव्यापकत्वाद् तस्य हृदयप्रदेशवर्तित्वोत्क्रमणगमनागमनानि च नोपपद्येरन्, अत एवात्मनोऽणुत्वमवश्याभ्युपेयम्। तथा चाह सूत्रकारः [6]उत्क्रान्ति गत्यागतीनाम्

किञ्च- [7]'एषोऽणुरात्मा चेतसा वेदितव्यः' [8]बालाग्रशतभागस्य शतद्या कल्पितस्य च, भागोजीवस्सविज्ञेयो स चानन्त्याय कल्पते इमाश्श्रुतयः साक्षाज्जीवस्याणुत्वं प्रतिपादयन्ति, न चात्मनोऽणुत्वे हृदि वर्तित्वं च स्वीकारे तस्य सम्पूर्णे शरीरे सुखाद्यनुभव. कथमुपपद्यतेति वाच्यम्, मणिद्युमणिदीपानां क्वचिदवस्थानेऽपि प्रभायास्सर्वत्रैकरूपेण व्याप्तिवज्ज्ञानस्य सर्वत्रैकरूपेण व्याप्त्या तदनुभवो न विरूध्यते, तथा चाह भगवान् बादराण - [9]गुणाद् वा लोकवत्

## जैनमतशोधनम् –

[1] आत्मसिद्धि-3
[2] प्रश्नोपनिषत् 3/6
[3] बृहदारण्यकोपनिषत् 6/4/2
[4] कौषितक्युपनिषत् 1/2
[5] ब्रहदारण्यकोपनिषन् 4/4/6
[6] शारीरकमीमासा 2/3/20
[7] मुण्डकोपनिषत् 3/1/9
[8] श्वेताश्वतरोपनिषन् 5/9
[9] शारीरिकमीमासा- 2/3/26

---

जैना: प्रतिपादयन्ति यत्- 'शरीरपरिमाणक आत्मा' इति। तेषांमतमालोचयता लोकाचार्येणोक्तं यत्- यद्यात्माशरीरपरिमाणक एव स्यात् तर्हि आत्मनोऽणुत्वप्रतिपादकानां [1]'एषोऽणुरात्मा चेतसा वेदितव्य: ' [2]'आराग्रमात्रो ह्यवरोऽपि द्रष्ट:' [3]'बालाग्रशतभागस्य' [4]'हृदिह्येष आत्मा' इत्यादिकानां श्रुतिनां विरोधस्स्यात्, किञ्च स्वकर्मवशात् गजशरीरवर्ती आत्मा पिपीलिकाशरीरे न मीयात्, एतद् विरोधजिहीर्षता आत्मन स्वरूपे संकोचविकास स्वीकारे आत्मनो नित्यत्वं परिहीयेत। किञ्चानेकशरीरपरिग्रहं कुर्वतां सौभरीप्रभृतीनां स्वरूपस्य भिदुरत्वप्रसंग इति आपातरमणीय एवार्हतानां आत्मनो देहपरिमाणवाद:।

## सांख्यमनशोधनम् –

सांख्यमतापलम्बिन:कतृत्वभोक्तृत्वादिकमात्मनोऽनंगीकृत्य तत् प्रकृते: स्वीकुर्वन्ति, ते कथयन्ति यत् कठबल्याम्- [5]'न जायते म्रियते वा विपश्चित्' इति श्रुत्या आत्मनो जन्मजरामरणरहिततां प्रतिपाद्य [6]'हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम्। उभौ तौ न विजानीतो नायं हन्ति न हन्यते' इति श्रुत्या जीवस्य हननादिक्रियायां कतृत्व प्रतिषिध्यते, अत एव जीवस्य कतृत्वाभिमानी मोह एव, भगवानप्यगीयत-

> [7]'प्रकृते: क्रियमाणानि गुणै: कर्माणि सर्वश:।
> अहंकार विमूढात्मा कर्ताहमिति मन्यते।।'

तथा च

> [8]'कार्यकारणकतृत्वे हेतु: प्रकृतिरूच्यते।
> पुरूष: सुखदु:खानां भोक्तृत्वे हेतु रूच्यते।।'

किञ्च

> [9]'नान्यं गुणेभ्य: कर्तारं यदा द्रष्टानुपश्यति।

---

[1] मुण्डकोपनिषत् 3/1/9
[2] श्वेताश्वतरोपनिषत् 5/8
[3] श्वेताश्वतरोपनिषन् 5/9
[4] प्रश्नोपनिषत् 3/6
[5] कठोपनिषत् 2/1/8
[6] कठोपनिषत् 2/19
[7] भगवद्गीता 3/29
[8] भगवद्गीता 16/20
[9] भगवद्गीता- 14/19

अतएव कतृत्वभोक्तृत्वादिका: प्रकृतेरेव धर्मा: नत्वात्मन:। तन्नोचितम्। यद्यात्मनो कर्तृत्वं नो भवेत्, तर्हि विधिनिषेधरूपाणि शास्त्राणि व्यवर्थानि स्यु:, शास्त्राणि हि-स्वर्गमोक्षादि फलस्य भोक्तारमेव कतृत्वे नियुञ्जते, न ह्यन्यस्यकतृत्वेऽन्यो नियुंजते। शासनाच्च शास्त्रम्। शासनं च प्रवर्तनम्। शास्त्रस्य च प्रवर्तनं बोधजननद्वारेणैव, अचेतनं प्रधानं नहि बोधयितुं शक्यम्।

अत: शास्त्राणामर्थवत्वं भोक्तुश्चेतनस्यैव कतृत्वे भवेत्। उक्तं च जैमिनिनाशास्त्रफलं प्रयोक्तरि। अत एव शास्त्राणामर्थवत्वाय जीवस्यकतृत्वमवश्यमभ्युपेयम्। सांसारिकप्रवृत्तिषु कतृत्वं न स्वरूपप्रयुक्तमपितु प्रकृतिसम्बन्धवृत्तम्। प्रकृते: क्रियमाणानीत्यादीनि वाक्यानि तथाविधमेव कतृत्वं प्रतिपादयन्ति, इममखिलमर्थसार्थमभ्यधत्त भगवान् बादरायण: [1]'कर्ता शास्त्रार्थवत्वात् इति सूत्रे, तच्च कतृत्वमीश्वराधीनमितिप्रत्यपीपदत् भगवान् बादरायण:- [2]'परात्तु तच्छ्रुते.' इति सूत्रे।

विशिष्टाद्वैतसिद्धान्ते जीवानां त्रयो भेदा: स्वीक्रियन्ते- बद्धमुक्तनित्या इति। इत्थं जीवानां परस्परं भेद: स्वाभाविक:।

## अद्वैतमतशोधनम् –

अद्वैतिन: आत्मनो भेदं नहि स्वीकुर्वन्ति। तेषां मते एक एव जीव:। अविद्याग्रस्तत्वात् स एवाखिलं मिथ्या जगत् पश्यति। अविद्यापगते स: भ्रमो नश्यति। तन्नोचितम्। यतो हि- [3]'पुरूष एवेदं सर्वं' 'सर्वख खल्विदं ब्रह्म' इत्यादीनि समानाधिकरण्यवाक्यानि ब्रह्माद्वैतस्यैव प्रतिपादनं कुर्वन्ति, समानाधिकरण्य वाक्यस्थानेक विशेषणविशिष्टस्यैकस्यैव वस्तुन: प्रतिपादने तात्पर्यवत्वात्। अतएव 'सर्व खल्विदं ब्रह्म' इति वाक्यं सर्वमितिपदवाच्यस्य सम्पूर्ण चिद्चिद्विशिष्टस्य ब्रह्मपदवाच्येन सत्यसंकल्पत्वादि विशिष्टेन ब्रह्मणा सह अभेदं प्रतिपादयति। तथैव 'पुरूष एवेदम्' इति समानाधिकरण्यवाक्यमपि। अत एव ब्रह्माद्वैतमेव शास्त्र तात्पर्यम्। 'एकस्सन् बहुधा विचचार' 'नित्यो नित्यानां'. इत्यादीनि वाक्यानि ब्रह्मप्रकारभूतानां जीवानां बहुत्वं कण्ठतो वदन्ति। अत एव जीवा द्वैतं श्रुतिहृदय विरूद्धम्।

किञ्च जीवाद्वैतवादिनां मते समकालमेव कस्यचित् सुखित्वं कस्यचिद् दु:खित्वं कस्यचिद् शिष्यत्वं कस्यचिदाचार्यत्वं च नोपपपद्यते। यत: जीवाद्वैतिनां मते एतेषा सर्वेषामनुभवानामाश्रयस्त्वेक एव, तस्यैव समकालमेव सुखित्वं, दु:खित्वं शिष्यत्वमाचार्यत्वादिकं च कथं सम्पत्स्यते? अथ स्याद् देहभेदादिति चेन्न, देहभेदस्यानुभवभेदे मूलत्व स्वीकार

[1] शारीरिकमीमांसा 2/3/33
[2] शारीरिकमीमांसा 2/3/40
[3] पुरूषसूक्त -2

---

अनेक शरीरपरिग्रहं कुर्वन् सौभरित्रश्रृषि: समकालमेव सुखी दु:खी च स्यात्। न चानुभवति सोऽयं मुनि· तथा, तस्मादात्मभेदोऽवश्यमंगीकर्तव्य:।

**भास्करमतशोधनम् –**

जीवेषु परस्परमौपाधिकभेदवादिनो, भास्करमतावलम्बिन आतिष्ठन्ते 'भोक्ता भोग्यं प्रेरितारं च मत्वा' [1]'ज्ञाज्ञौद्वावजावीशनीशौ' [2]क्षरं प्रधानममृताक्षर हर इत्यादिषु श्रुतिषु 'भोक्ता' 'अज्ञ:' हर: इत्यादिभिरेक वचनान्तपदै जीवस्य निर्देशाज्ज्ञायते यत् जीवानाम्भेद एव स्वाभाविकोऽभेदस्त्वौपाधिक:, तस्यैवौपाधिकस्य भेदस्य प्रतिपादन 'नित्योनित्याना।मित्यादिका श्रुतय: कुर्वन्ति इति। तन्नोचितम्। मोक्षदशायामपि भेदस्य सत्वात्, तथा चागीयत भगवान् गीतायाम् -

> [3]इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागता:।
> सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च।।

इति वाक्यं प्रतिपादयति यत् वक्ष्यमाणं ज्ञानमवाप्य जीवा. मुक्तौ परमात्मधर्माणा समतामुपयान्ति, ते हि सृष्टिसंहारयोर्दिषया अपि नो भवन्ति अस्मिन् वाक्ये 'मम साधर्म्यमागता: इत्यंशे बहुवचनान्तप्रयोग: जीवानां बहुत्वं साधयति, यदि भेद औपाधिक आविद्यको वा स्यात् तर्हि मोक्षावस्थायां तन्नश्येत्, यस्मात् कारणान्नहि नश्यति तस्मात् कारणाज्ज्ञायते यत् भेद एव स्वाभाविक इति। यतो हि सर्वविधोपाधिविनिर्मुक्तास्तथैव मोक्षशब्देनाभिधीयते। अत एव हि सदा पश्यन्ति सूरय: इत्यादि वाक्येषु बहुवचनान्त प्रयोग. सूरिपदवाच्यमुक्तविषयक उपपद्यते। भोक्ताभोग्यमित्यादि श्रुतयश्च जीवजातेरेकत्वमादायो पपद्यत इति।

एवं भगवत्स्वामिनारायणाभिमत - वेदवेदांगाभिमतजीवस्वरूपं यथामति निरूपितम्।

---

[1] श्वेताश्वतरोपनिषत् 11/9
[2] श्वेताश्वतरोपनिषत् 1/9
[3] श्रीमद्भगवद्गीता 14/5

## ।।ईश्वरस्वरूपनिरूपणम्।।

प्रथमाध्याये प्रसंगप्राप्तेश्वरस्वरूपनिरूपणे प्रतिपादितमस्त्येव यत् जीवस्यैवापरभेदात्मका ईश्वरा:, ब्रह्माण्डोत्पत्तिस्थितिलयकारणभूता: सर्वज्ञा: परंतु महामायासस्पर्शयुक्ता पुरूष-सगुणब्रह्म मायाशवलित ब्रह्म-प्रधानपति-अनिरूद्ध- प्रद्युम्न-सकर्षणादि अनेकाभिधानवन्त: सन्ति। प्रधानपतेराब्रह्मापर्यन्ता: जीवा: उत्तरोत्तर गुणशक्त्यैश्वर्यादि सम्पन्ना: जीववदेव नित्या: अजा: स्वयम्प्रकाशा. च। जीवगतसमस्तगुणसम्पृक्तास्तेऽनेकब्रह्माण्डत्वादसंख्याता:, परस्परभिन्नाश्च, जीवेश्वरयोर्मध्ये खद्योततारकवत् भेदो ज्ञेय:, ईश्वराणां सत्ता सामर्थारायुर्ज्ञानादिकं जीवापेक्षयात्यतिधिक अत एव ते जीवेभ्य: भिन्ना: स्वतन्त्रा: पराश्च, स्वप्रशासित ब्रह्माण्डे यादृक्समये यादृश्यावश्यकता भवेत् तदा त ईश्वरा: तादृवप्रकारकदेह धारणेन स्वकार्यसिद्धे सामर्थ्यवन्ता ।

यद्यपि भगवान् स्वामिनारायण: तत्वत्रयस्येव प्रतिपादक अत एव स्वहस्तलिखितशिक्षापत्र्याम्-

।।जयश्रीस्वामिनारायण।।

श्रीहरिवाक्यसुधासिन्धौ उपनिषदां प्रभाव:

---

[1]हृत्स्थोऽणुसूक्ष्मचिद्रूपो, ज्ञाता व्याप्याखिलां तनुम्।
ज्ञानशक्त्या स्थितो जीवो ज्ञेयोऽच्छेद्यादि लक्षणै:।।
त्रिगुणात्मा तम: कृष्णशक्तिर्देहतदीययो:।
जीवस्य चाहं ममता हेतुर्मायावगम्यताम्।।
हृदये जीववज्जीवे योऽन्तर्यामितया स्थित:।
ज्ञेय: सवतन्त्र ईशोऽसौ सर्वकर्मफलप्रद:।।

इत्येव तत्वत्रयस्यैव निरूपणं कुर्वन्ति, तथापि हरिवाक्यसुधासिन्धौ यदीश्वरभेदो निरूपित. तज्जीवस्यैव नान्यस्य, परब्रह्म परमात्मा श्रीहरि: सर्वदिव्यगुणैश्वर्यशक्तिसामर्थ्यशील सच्चिदानन्दस्वरूपानन्दघनैकरसकिशोरमूर्ति. [2] स ऐक्षत बहुस्यां प्रजायेय इति सूक्ष्मजडचेतनविशिष्टब्रह्म शरीरी स्वयं संकल्प्य, संकल्पविशिष्टं स्वीयशरीरमक्षरब्रह्म सम्पाद्याक्षरब्रह्मणा प्रेरितो महापुरूषोंऽक्षर धामस्थमुक्तो ब्रह्ममुक्तो यथावसरभगवत् सेवानुरक्त. परब्रह्मानिवतब्रह्मणा प्रविष्ट: प्रेरित: सञ्चालित: सन् स्वांगस्थितां सूक्ष्मां महामायां स्थूलावस्थां प्रसम्पाद्य त्रिगुणसाम्यावस्थातो विषमावस्थां कृत्वा मायाधिष्ठित· स्वामी स्थूलावस्थो भूत्वा परब्रह्मान्विताऽक्षरब्रह्मान्वितमहापुरुष: क्षोभात्मकसञ्चालनशक्तिसामर्थ्यात्मकवीर्य विकासकरमौष्ण्यं चैतन्यस्वरूपं शरीरात्मक स्थौल्यापन्न महामायायां शरीरपत्न्यां मूलप्रकृतौ नित्यायां कारणान्तरशून्यायां मूलायां अमूलकायां जडायां गर्भयोग्यायां सम्यग्भूत्वोपस्थितायां विषमविकारारम्भपरायाणायां न्यधत्त। 'वीर्यमाधत्तवीर्यवान्' 'वीर्यमवासृजत्' इत्यादिका. श्रुतय:। [3]'मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम्' श्लोकस्यास्य व्याख्यानावसरे श्रीमत् रामानुजाचार्ये लिखति यत्- 'अचेतना प्रकृति: महदहंकारादिविकाराणां कारणतया 'महद्ब्रह्म' इति उच्यते श्रुतौ अपि क्वचित् प्रकृति: अपि ब्रह्म इति निर्दिश्यते 'य: सर्वज्ञ: सर्ववित्' 'यस्य ज्ञानमयं तप:' [4]'तस्मादेतद्ब्रह्मनामरूपमन्नं च जायते' इत्यादय: श्रुतयोऽपि समर्थका:,

[5]'तस्मादभूदहंकारस्त्रिगुणस्तत्र सात्विकात्।
मन इन्द्रिय देवाश्च राजसादिन्द्रियासव:।।
तामसात् शब्दतन्मात्रा द्वाराऽऽकाशमजायत।
तत: स्पर्शस्ततो वायुस्ततो रूपं ततोऽनल:।।
ततो रसस्ततश्चापस्ततो गन्ध ततश्च भू:।

---

[1] शिक्षापत्री श्लो. 105-107

[2] छान्दोग्योपनिषत् - 6/2/3

[3] श्रीमदभगवद्गीता 14/3

[4] मुण्डकोपनिषत्- 1/1/9

[5] श्रीहरिवाक्यसुधासिन्धु: त· 12 श्लोक 31 32 33

श्रुतिरपि एवमेव प्रतिपादयति तद्यथा- [1]'तस्माद्वा एतस्मात् आत्मन. आकाशस्संभूत., आकाशाद्वायु: वायोरग्नि: अग्नेराप: अद्भ्य: पृथिवि' श्रीभाष्ये श्रीमद्रामानुजाचार्य· [2]'जन्माद्यस्य यत:' इति सूत्रस्य व्याख्यावसरे क्रममेतच्च प्रतिपादितवानस्ति।

एवं समुद्भूतभूतसंघातद्वाराविविधविचित्रसृष्टे: प्रादुर्भाव:, तस्योत्पत्तिकरणे संरक्षणे विनाशे च येऽधिकारिण: सन्ति त ईश्वरा:, निर्मलान्तरत्वात् ते न पुन: संसृतिमभिगच्छन्ति अत एव भगवता ईश्वराणां भेद: जीवेभ्य: पृथक्कृत:, तथा च सृष्टेरनादित्वात् ईश्वरस्याप्यनादित्वम्, जीवस्यैवापरभेदत्वात् जीववदेव भगवदुपासनयाऽव्यभिचारिण्या च भक्त्या तेषां मोक्ष: सम्भवति। ईश्वरस्वरूपनिरूपयन् सर्वतन्त्रस्वतन्त्र. विद्वत्प्रवर: श्रीमत्कृष्णवल्लभाचार्यमहाभागा: 'श्रीस्वामिनारायणवेदान्तसारे' लिखति यत्

## डॉ. श्री कृष्णवल्लभाचार्याणामीश्वरविषयकमतम्

ईश्वरत्वं नाम - जीवभिन्नत्वे सति हिरण्यमयकोशान्तर्गतचेतनत्वम्। ब्रह्माण्डानन्तर्गतत्वे सति हिरण्यमय कोशान्तर्गतचेतनत्वम्। प्रकृतिलयविराट्-सूत्रात्माऽव्याकृत-महाकारणाऽन्यतमाऽन्तर्गतचेतनत्वम्। जीवमुक्त, ब्रह्मभिन्नत्वे सति नियाम्य चेतनत्वं वेत्यादीनि लक्षणान्यवगन्तव्यानि।

[3]देहत्रये विराडादौ व्याप्योत्पत्तिस्थितिक्षयान्।
करोति जगतां यस्तु सर्वज्ञो ज्ञेय ईश्वर:।।

सर्वज्ञ इत्यस्य बहुज्ञ इत्यर्थ:। ईश्वरा: सर्वेष्टावरणादिहिरण्यमयकोशान्त.स्थानवासिनो भवन्ति, तद्यथा- चतुर्दशभुवनात्मकाण्डकराहाऽन्वितब्रह्माण्डस्य परित: प्रथमावरणं पृथिव्यात्मकं, तच्च 'पञ्चाशत्कोटियोजनात्मक ब्रह्माण्डपरिमाणाद्दशगुणं पञ्चवृन्दयोजनयामं विद्यते, तच्च शब्दस्पर्शरूपरसगन्धगुणयुतं भवति।।1।। तदुपरि द्वितीयं जलस्यावरणं ततो दशगुणं पञ्चखर्वयोजनयामं शब्दस्पर्शरूपरसगुणयुतं चाऽस्ति।।2।। तदुपरि तृतीयं तेजस आवरणं ततो दशगुणं पञ्च निखर्वयोजनयामं शब्दस्पर्शरूपगुणयुतं चाऽस्ति।।3।। तदुपरि वायोरावरणं ततोदशगुणं पञ्चशंखयोजनयामं शब्दस्पर्शगुणयुतं चाऽस्ति।।4।। तदुपरि आकाशस्यावरणं-ततो दशगुणं पञ्चपद्मयोजनयामं शब्दगुणयुतं चाऽस्ति।।5।। तदुपरि- अंहकाराऽवरणं ततो दशगुणं पञ्चसागरयोजनयामं अभिमानगुणयुतं चाऽस्ति।।6।। तदुपरि - महत्तत्वावरणं ततो दशगुणं पञ्चाऽन्त्ययोजनायामम् अध्यवसाय गुणयुतं चाऽस्ति।।7।। तदुपरि प्रकृत्या वरणं ततो दशगुणं पञ्चमध्ययोजनायाम त्रिगुणात्मकं गाढतमोरूपं धूम्रवर्णं चाऽस्ति।।8।। तानीमानि

[1] तैत्तिरीयोपनिषत् आनन्दवल्ली ।
[2] शारीरकमीमांसा 1/1/2
[3] सत्संगिकाजीवनम्

वलयाकारेणसंस्थितानि, एतेषु प्रकृतिलयं गता आत्मानो निवसन्ति, विदेहाश्चापि तत्र निवसन्तीति केचित्। प्रकृतिलयाः सर्वे चेतना ईश्वरा इत्युच्यन्ते- 'विदेह प्रकृतिलयास्तु मोक्षपदे वर्तन्ते न लोकमध्ये- 'इतियोगदर्शनव्यासभाष्यात्, 'तेषां मुक्तिप्रायत्वादीश्वरकोटित्वाच्चेति' वार्तिकाच्च। प्रकृतिलया यथा- ये पृथिविजलतेजोवायु गगनात्मकमिदं शरीरमेवात्मानमभिमन्यमानाश्चार्वाकाः मरणान्तरपृथिव्यादि पञ्चावरणेषु लयं गच्छन्ति, शब्दस्पर्शरूपरसगन्धात्मकपञ्चतन्मात्राण्यात्मत्वेनाऽभिमन्यमाना प्राणाऽपानसमानव्यानोदानादिवायूनात्मत्वेनाऽभिमन्यमानाश्च नास्तिका अपि तत्रैव लयं गच्छन्ति। श्रोत्रत्वक्चक्षूरसनाघ्राणवाक्पाणिपादपायूपस्थात्मकानीन्द्रियाण्यात्मत्वेनाऽभिमन्यमाना अपि नास्तिकास्तत्रैव लयं गच्छन्ति। मन एवात्मेति मन्तारोऽहंकारं क्षणिकां बुद्धिं चाऽत्मानमभिमत्य तदुपासकाः क्षणिकात्मवादिनश्चाहंकारात्मकावरणे लयं गच्छन्ति। तत्रेमे संग्रहश्लोकाः:-

'दश मन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः।
भौतिकास्तु शतं पूर्णं सहस्त्रन्त्वाभिमानिकाः।।
बौद्धा दशसहस्त्राणि तिष्ठन्ति विगतज्वराः।
पूर्णं शतसहस्त्रं हि तिष्ठन्त्यव्यक्तचिन्तकाः।।
पुरूषं तत्परं प्राप्य कालसंख्या न विद्यते।। इति।।

## प्रथममुक्तिस्थानम् –

अतो येऽष्टावरणेषु प्रकृतिकार्यात्मकेषु लीना लिंगदेहेन सह गतास्ते प्रकृतिलया इति।। विदेहा अपि द्विविधाः- स्थूलशरीरयुताः सूक्ष्म शरीरमात्रयुताश्च। तत्र स्थूलशरीरावच्छिन्ना जनकनृपत्यादयः प्रसिद्धाः। ये पुनः स्थूलं शरीरं विहाय सूक्ष्मशरीरेण सह वर्तमाना प्रकृतिलयं प्राप्ता विदेहास्ते द्वितीया इति। तदिदं प्रकृतिलयात्मकं प्रथमं मुक्तिस्थानम्।।

## द्वितीयमुक्तिस्थानम् -

तान्यावरणानि वेष्टयित्वा चिदाकाशस्तिष्ठति, स एव विराट् पुरूषस्य लोक 'आलोकाकाश' संज्ञक इति। तत्र विराट् स्वरूपं पुरूषाकृत्यपि विराजते। 'ततो विराऽजायते' त्यादिवेदैर्महाविष्णुतो विराडुत्पत्तिवर्णनात्। तथा च यथा लोके स्थूलसूक्ष्मकारणमहाकारणानि चत्वारि शरीराणि विद्यन्ते तथा महाविष्णोरपि विराट्सूत्रात्माऽव्याकृतमहाकारणानीति चतुःशरीराणि सन्ति। तन्मध्यतो विराट् पुरूषः स्थूलशरीरमिति। स एव 'अतिष्ठद्दशांगुल' मित्यादिमन्त्रैरिदं दशांगुलपरिमितं ब्रह्माण्डमावृत्य स्थितोऽस्तीति वर्ण्यते। तस्याऽऽलोकाकाशलोकोऽष्टमावरणतो दशगुणो विस्तृतः पञ्चपरार्धयोजनायामो वलयाकारेण दशदिक्षु व्याप्तो वर्तत इति। तदुपासकानां विराट्स्वरूपप्राप्तिरालोकाकाशश्च मोक्षस्थानमिति। तदिद द्वितीयं मुक्तिस्थानम्। एतद्गताश्चेतनाः सर्वेऽपीश्वरा इत्युच्यन्ते।।

## तृतीयमुक्तिस्थानम् –

अथ तदुपरि तत्समन्तात् वलयाकारो महाविष्णो: सूत्रात्मकसूक्ष्मशरीरस्य कार्यात्मको 'निराकारचिन्मयाकाश:' - कैलास लोको विद्यते। स च ततो दशगुण. पञ्चाशत्परार्धयोजनाऽऽयाम:। तत्र दिव्यसगुणशिवलिंगज्योतिरस्ति। पञ्चमुखवत्या स्त्रियो सहाऽहंकारपुरूषो मूर्तिमान् राजते, तत्र दिव्यसाऽऽकृति गायत्रीसहिता दिव्या वेदपुरूषाश्चत्वारोऽनन्तैश्वर्यशक्त्यादिभिर्जुष्टास्तद्वन्दनां कुर्वन्ति। तदुपासकानां तन्मुक्तिस्थान तृतीयमिति। तत्र गताश्चेतना इत्युच्यन्ते।।

## चतुर्थमुक्तिस्थानम् –

अथ तदुपरि तथाभूतो महाविष्णोरव्याकृतात्मककारणशरीरस्थ कार्यात्मक. 'सत्वस्वभावाकाशो विष्णुलोको विद्यते। स च ततो दशगुण: पञ्चशतपरार्धयोजनाऽऽयाम.। तत्र विष्णोर्दिव्यं स्वरूपं लक्ष्मीजुष्टं विराजते। तत्र सप्तचैतन्यानि सन्ति। तत्र लक्ष्मीप्रभृतिसप्तशक्तय: सन्ति। विष्णुरत्रानन्तभक्तवृन्दसेवितो भिन्न भिन्न मूर्तिभिर्विराजत इति। तदुपासकानां तन्मुक्तिस्थानं चतुर्थमिति। तत्र गताश्चेतना ईश्वरा इत्युच्यन्ते।

## पञ्चमुक्तिस्थानम् –

अथ तदुपरि तथाभूतो महाविष्णोर्महाकारणशरीरस्य कार्यरूपो 'अमृतमयाकाशो' महाविष्णुलोको विद्यते'। स च ततो दशगुण पञ्च सहस्त्रपरार्धयोजनाऽऽयाम.। तत्र महामायाख्यमहालक्ष्म्याऽन्तकोटिदिव्यशक्तिसहितया संसेवितो महाविष्णु षोडशकलापरिपूर्णो विराजते। तत्र पञ्चविंशति द्विपाश्चैतन्यात्मका विभक्तास्तत्र तत्तच्छक्त्यैश्वर्यादिसेवित-तत्तदवताराऽऽकृतिभिर्विराजते स·। स चात्र लोके भगवद्रूपतयाऽवतरतीति तत्तदवतारोपासकानां तत्र तत्र द्वीपे तन्मुक्तिस्थानमिति।। त इमे सर्वेऽपीश्वरा मायाया सत्वगुणमात्र संसृष्टा: परमसुखिन·। सोऽयं महाविष्णुर्मूलमायाया उदरे संस्थितोऽस्ति, स च गर्भो 'हिरण्यमयकोश' इति संज्ञक:। मूलमाया नित्याऽजैका च नित्यगोलोकात्मकब्रह्मधामनि तदेकदेशस्थाऽस्ति। सृष्ट्यादौ परब्रह्मणाऽक्षरब्रह्मसमीपेऽलोकितं तदाऽक्षरस्थ. कश्चिन्मुक्तपुरूष. परमेश्वरेच्छां विज्ञाय मायया सह संयुक्त:, ततो मायातो महत्तमो रूपं गोलकाकारमण्ड-महाविष्णुगर्भमुत्पन्नमिति। तत्र श्रुतय:। [1]'तम आसीत् सगूढमग्रे' [2]'हिरण्यगर्भ समवर्तताग्रे भूतस्य जात: पतिरेक आसीत्' एवमनेके हिरण्यमयकोशा: प्रादुर्भवन्ति लीयन्ते चेति। तत्परं माया कार्यं नास्ति 'यद्गत्वा न निवर्तन्ते तद्धाम परमं ममेत्यादिस्मृतिप्रतिपादिते ब्रह्मलोके माया संसर्गाऽभावादिति।

एवंमीश्वरनिरूपणं कृतं विद्वत्प्रवरै.। केचित् वृद्धा: मतेऽस्मिन् अनादरवन्ता तथापि बहव: सम्मता एव। सर्वेऽपि प्रतिपादयन्ति यत् जीवापेक्षया श्रेष्ठा मुक्तापेक्षयाकनिष्ठा. ईश्वरा: सन्ति, तेऽपि भगवददुपासनया परमां मुक्तिं लभन्ते इति।

---

[1] ऋग्वेदस्य सू 12 मं 10
[2] ऋग्वेदस्य सू 129/ म 3

।।इति ईश्वर निरूपणम्।।

## ।।अथ मायास्वरूप निरूपणम्।।

भगवत्स्वामिनारायणाभिमतमायास्वरूपम्

[1]त्रिगुणात्मा तम: कृष्णशक्तिर्देह तदीययो: ।
जीवस्य चाहंममताहेतुर्मायावगम्यताम् ।।

श्रीहरिवाक्यसुधासिन्धौ भगवता श्री स्वामिनारायणेनोक्तं-

पृथिव्यन्त.स्थ बीजानि यथा मेघाम्बुयोगत: ।
उद्गच्छन्तिम तथा जीवा मायया ब्रह्मयोगत: ।।
नित्यसिद्धा एव जीवा मायायां सन्ति सर्वश ।।

अय भाव - यथामेघाम्बुयोगत: पृथिव्यन्त.स्थ बीजानि दृष्टिगोचराणि भवन्ति तद्वदेव जीवा भूमिस्थानीयमायायामनादिकालतोऽवस्थिता बीज स्थानीयक्षत्रज्ञा. सर्गादौ परब्रह्मप्रेरितब्रह्मदृष्टिसन्नोदितोऽक्षरमुक्तात्मकपुरूषरूपमेघाम्बुयोगात् प्रादुर्भवन्ति, अनेन परब्रह्मण मायाया जीवन्य चानादित्व सिद्ध्यति।

[2] 'मूलप्रकृतिरविकृति:' इत्यादिषु प्रकृतिशब्द उपादानकारणवाचकोऽस्ति, भगवान् बादरायणोऽपि [3] 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' इति सूत्रे प्रकृति शब्दमुपादान कारणस्यार्थे प्रायुङ्क्त। सा मिश्रसत्वापि विकाराणामुपादानत्वादेव प्रकृतिरित्यभिधीयते, ज्ञानविरोधित्वादविद्येति निगद्यते- अविद्या शब्दश्च 'नञर्थास्षट्प्रकीर्तिता' इत्यनुसारेण यद्यपि विद्याभावन्य, विद्येतरन्य, विद्याविरोधिनश्च वाचक· तथाप्यत्र विद्याविरोधिन एव वाचक प्रमाणं चात्र स्मार्तम्- [4] श्रूयता चाप्यविद्याया. स्वरूपं कुलनन्दन। अनात्मन्यात्मबुद्धिर्या अस्वेस्वमिति या मति· विचित्र सृष्टिकारकत्वान्मायेत्युच्यते।

(गुणा. सत्वरजस्तमांसि, सत्वादय आत्मस्वभावो यस्या: सा त्रिगुणात्मेति तथा च श्रुति - [5] 'अजामेकां लोहितशुक्लकृष्णाम्' शिक्षापत्र्या षष्ठोत्तरशततमस्य श्लोकस्य व्याख्यानावसरे लिखति शतानन्दमुनि: यत् लोहितादिशब्दै रज· सत्व तमो गुणा उक्ता. सेय गुणमयी माया' 'ममांगमाया गुणमप्यनेकधा' 'प्रकृतिर्गुणसाम्यं वै' 'स एवेद ससर्जाग्रे भगवानात्ममायया सद्सद्रुपया चासौ गुण मय्याऽगुणो विभुरित्यादिभागवतोक्तेश्च।) मायाया अनिवर्यनीयत्व समालोचनयम् अस्या अनिर्वचनीयत्वं समालोचयन् रघुवीराचार्य लिखति -

(यत्तु मायाशब्दस्य सदसदनिर्वचनीयार्थताश्रयणं ततु मायामृगादिषु बाधितत्वादननुगतम्। नहि मायामृगादि: शुक्तिरजतवन्मिथ्या, 'माया मृगो हि मारीचसृष्टिरेव हि तात्त्विकी न चेद्रामशरेणास्य निधनं नोपपद्येत। नवा मिथ्याभूते शुक्तिरजतादौ माया शब्द: प्रयुज्यते। ननु- 'नासदासीन्नोसदासीत्तदानीं तम आसीत्' इति श्रुत्या सृष्टे: प्राक् सदसती निषिध्य

---

[1] शिक्षापत्री- 106
[2] साख्यकारिका-3
[3] शारीरकमीमासा - 1/4/23
[4] श्री विष्णुपुराण- 6/7/10=11
[5] महानारायणोपनिपत् 8/4

तमोमात्रसद्भावनिरूपणाद्वियदादिविभ्रममूलभूतं तम: शब्दवाच्यं सदसद्विलक्षणं सिद्धम्, सेयं माया [1]'मायां तु प्रकृतिं विद्यादित्यत्रोच्यते अत एव 'अनृतेन प्रत्यूढा' इति श्रुत्यैकार्थ्यमपि, मैवम्- नहि कालविशेषे सद सतो: प्रतिषेधमात्रेण भवदभिमतमनिर्वचनीयत्व तमसि सिद्ध्येत्, सदसदुभयशून्ये समयविशेषे सता सदसदुभयविलक्षणेनैव भाव्यमिति चेत्सत्यम्, इह समय विशेषे प्रतिषिध्यमाने सदसती के इति पर्यालोचनीयम्, यदि पारमार्थिक निरूपाख्ये स्यातां तदा तयो: प्रतिषेधपूर्वकं तमोमात्रस्य सत्तावर्णनात्तमसो भवदभिमतमनिरर्वचनीयत्वं सिद्ध्येत् न हि तयोरिह निषेध: सत: पारमार्थिकस्य ब्रह्मस्वरूपस्य तदानीमपि सत्वात्, असतो निरूपाख्यस्य शशश्रृंगस्य कदाप्यसत्वेन कालविशेषे तन्निषेधानुपपत्ते:, कालविशेषे निषेधो हि कालान्तरे सम्बन्धमवगमयति, यदि च सदसच्छब्दाभ्यां व्यावहारिकप्रातिभासिकयो: प्रतिक्षेप. तदा तमस्तदुभयविलक्षणत्वसिद्धया पारमार्थिकत्वं तुच्छत्वं वाऽऽपतेत्। तस्मान्नानेन वाक्येन भवदभितानिर्वचनीयसिद्धि:, सदसतोनिषधस्तु व्यष्टिचेतनाचेतनयोर्विलयाभिप्रायेण, यदि चास्य वाक्यस्य सदसतो: कालविशेषेऽसत्वप्रतिपादने न तात्पर्यम् किन्तु तमस. सदसद्वैलक्षण्यज्ञापनमात्र एव तात्पर्यम्, तम आसीत् तच्च न सत् नाप्यसदित्येव वाक्यत· परिनिष्पन्नोबोध इति विभाव्यते। तदा 'नासदासीन्नो सदासी' दितिश्रुतिशैली भग्नस्वरसा भवेत्, स्वरसत: काल विशेषे सदसतो: प्रतिषेधो ह्यवगम्यते, तथा तात्पर्यग्राहकं भवदाग्रहमन्तरेण न किञ्चिदुपलभ्यते च, किंच यद्यनेन वाक्येन तमसोऽनिर्वचनीयत्वं सिद्ध्येत् 'अनादि मत्परं ब्रह्म न सत्तन्नासदुच्यते' इत्यनेन शुद्धात्मस्वरूपस्यैवानिर्वचनीयत्वं किं न गम्येत्, 'अनृतेन प्रत्यूढा' इत्यनेनापि न तत्सिद्धि:, ऋतशब्दोह्यनुकूलकर्मपर: अनृतशब्दश्च तद्विरोधिप्रतिकूलकर्मपर: 'यथा पुष्पितस्य दूरादेव गन्धो वात्येवं पुण्यस्य कर्मणो दूराद् गन्धो वातीत्यनन्तरं - 'एतमनृतादात्मानं जुगुप्सेदिति' पुण्यप्रतिशिरस्तयानृतशब्दप्रयोगात्, 'ऋतं सत्यं तथा धर्म' इत्यादि वचनाच्च, अत एव च ऋतशब्दस्य सुकृतफले 'ऋतं पिबन्तावित्यत्र निर्देश:, इत्यं च मुमुक्ष्वपेक्षया पुण्यस्यापि पापत्वेनेहानृतशब्देन" पुंण्यं पापं वा मोक्षविरोधि कर्मसामान्यमुच्यते, कर्मणा प्रत्यूढास्तत्तु न विदन्तीतिवाक्यार्थ: तस्मान्नानेनानिर्वचनीयसिद्धि.।)

### मायाविषयकं निरीश्वर सांख्यमत समालोचनम् –

सांख्यास्तु सत्वरजस्तमांस्येव समुदितानि प्रकृति:, गुणत्वेन व्यवहारस्तु परार्थतैकस्वभावत्वात्, सर्वाप्यस्या: प्रवृत्ति: पुरूषार्थैव खलु 'नानाविधैरूपायैरूपकारिण्यनुपकारिण: पुंस:। गुणवत्यगुणस्थ सतस्तस्यार्थमपार्थकं चरति।।' पुरूष पशुबन्धनत्रिगुणरज्जुरूपत्वाद्वागुणशब्देन निर्देश इत्याहु:।

तदसत्। प्रकृतिगुणत्वेन सत्त्वादीनां स्मरणात्। तथा च वचनानि- [2]कार्यते ह्यवश· कर्म सर्व: प्रकृतिजैर्गुणै:, [3]प्रकृते: क्रियमाणानि गुणै: कर्माणि सर्वश: [4]'प्रकृतेर्गुण सम्मूढा.'

---

[1] श्वेताश्वतरोपनिषत् 4/10
[2] भ गी. 3/5
[3] भ. गी. 3/27
[4] भ गी 3/29

२८- ५४८ ग९।

।।जयश्रीस्वामिनारायण।।
श्रीहरिवाक्यसुधासिन्धौ उपनिषदां प्रभावः

---

प्रभवन्ति सर्वत्र कार्ये, तस्मादपरिमितमविषमसत्त्वादिसमुदायरूपं [1] 'अजामेकाम्' इति श्रुतिसम्प्रतिपन्नमखिलोपादानम्, गुणसाम्यतश्च महदादिकार्यवर्गतो विशेष., एतच्च जगन्निर्माणे न किञ्चिदभिज्ञमपेक्षते, नहि क्षीरं दधितया परिणमदधिष्ठातारमपेक्ष्यते, न वा वारि दविसृष्टं वारि नालिकेरतालादि विविध रसात्मना परिणमदधिष्ठातारमपेक्ष्यते, स्वतः प्रवृत्तिशक्तिमतः परिणामैकशीलस्यास्यविविधपरिणामे का वाऽन्यस्य प्राज्ञस्याधिष्ठानुरपेक्षा, तस्माद् ब्राह्मात्मकं स्वतन्त्रमेवेदं जगत्कारण मिति।

श्रुतिस्मृतिशतक्षोभादुपपत्तिपराहतेः। वेदाचार्यो वादमेनं दूरीचक्रे श्रुतेः पथ.।। श्रुतयस्तावत् सर्वज्ञस्य सर्वशक्तेः परस्य ब्रह्मणो जगत्कारणत्वं वर्णयन्ति- [2]'य. सर्वज्ञ सर्ववित् यस्य ज्ञानमयं तपः, तस्मादेतद् ब्रह्म नामरूपमन्नं च जायते, [3]'तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः आकाशाद्वायुः वायोरग्निः अग्नेराय. अद्भ्यः पृथिवि, [4]सोऽकामयत बहुस्यां प्रजायेयेति, 'स तपोऽतप्यत स तपस्तप्त्वा इदं सर्वमसृजत् यदिदं किञ्च' तत्सृष्ट्वा तदेवानुप्राविशत्, [5]तदनुप्रविश्य सच्च त्यच्चाभवत् [6]निरूक्तं चानिरूक्तं च निलयनं चानिलयनं च विज्ञानं चाविज्ञानं च [7]'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्म [8]'यतो जानानि भुवनानि विश्वा' 'आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किञ्चन मिषन्, स इक्षत लोकान्नुसृजा इति [9]स इमाँल्लोकानसृजत् [10]'ब्रह्म वा इदमग्र आसीत्' [11]'सदेव सोम्येदमग्र आसीत्' [12]'तदैक्षत बहु स्यां प्रजायेय' 'किंस्विद्वनं क उ स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुः, ब्रह्मवनं ब्रह्म स वृक्ष आसीत् यतो द्यावापृथिवी निष्टतक्षुः मनीषिणो मनसा पिब्रवीमि वो ब्रह्माध्यतिष्ठद्भुवनानि धारयन्' [13]'कर्तारमीशं पुरूषं ब्रह्मयोनिम्'

तथा च स्मृतयः - 'आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्'। अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः।। ततः स्वयंभूर्भगवानव्यक्तो व्यंजयन्निदम्। महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुद.।।' 'सोऽभि ध्याय शरीरात् स्वात्, सिसृक्षुः सकलाः प्रजाः। अप एव ससर्जादौ तासु

---

[1] महानारायणोपनिषत् 8/4
[2] मुण्डकोपनिषत् - 1/1/9
[3] तैत्तिरीयारण्यक 2/1
[4] तैत्तिरीयोपनिषत् 2/6
[5] तैत्तिरीयोपनिषद् 2/6
[6] तैत्तिरीयोपनिषत् 2/6
[7] तैत्तिरीयोपनिषद् 3/1
[8] श्वेताश्वतरोपनिषत् 4/4
[9] ऐतरेयोपनिषत् आत्मषट्क 1/1
[10] बृहदारण्यकोपनिषत् 1/4/1
[11] छान्दोग्योपनिषत् 6/2/1
[12] छान्दोग्योपनिषत् 6/2/3
[13] मुण्डकोपनिषत् 3/1/3

वीर्यमवासृजत्' [1]'अहं कृत्स्नस्य जगत: प्रभव: प्रलयस्तथा [2]'अहं सर्वस्य प्रभवो मत्त: सर्वं प्रवर्तते' 'कुत: सृष्टमिदं सर्वं जगत्स्थावरजंगमम्। प्रलये च कमभ्येति तन्मे ब्रूहि पितामह।। नारायणो जगन्मूर्तिरनन्तात्मा सनातन:। तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम।। अव्यक्तं पुरूषे ब्रह्मन् निष्क्रिये सम्प्रलीयते। विष्णो: सकोशादुत्पन्नं जगत्तत्रैव च स्थितम्।। स्थितिसंयमकर्ताऽसौ जगतोऽस्य जगच्च स:'' एवमादिश्रुतिस्मृतिशतविक्षोभप्रसंगभिया प्रधानकारणवाद: प्रत्याख्यात: सूत्रकृता यथा [3] 'ईक्षतेर्नाशब्दम्' [4] 'स्मृत्यनवकाशदोषप्रसंग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसंगात्' इत्यादिना, अनुपपत्तिश्च निरूपिता [5]'रचनानुपपत्तेश्च नानुमानं प्रवृत्तेश्च' इत्यादिना।

अयं भाव:- जगतो विचित्ररचना येयं सा खल्वधिष्ठातारमभिज्ञमनपेक्ष्याचेतनभूतया प्रकृत्या नोपपद्यते, नहि किमपि कार्यं स्वाभिज्ञानधिष्ठाताचेतनोपादानकं दृष्टम्, घटादिकं हि स्वाभिज्ञकुलालाधिष्ठितमृदुपादानकं दृश्यते, यदपि पयोऽम्बुप्रभृत्यधिष्ठातारमनपेक्ष्यैव कार्यविशेषारंभाय भवतीति, तदपि न, तत्राप्यस्त्येव प्राज्ञोऽधिष्ठाता, अन्यथा तदनुपपत्तिरेव, तस्माद्गुणसाम्यावस्थातो गुणवैषम्यं प्रापयितुरभावाद्रचनानुपपत्तिरपरिहार्येति।

ननु- यद्यप्यचेतनाप्रकृति: तथापि यथा दृक्शक्ति विकलोऽप्यन्ध: स्वयं गमनशक्तिमान् गमनशक्तिविधुरस्यापि पंगोरनन्धस्य सश्लेषमात्रेण सपदि समुत्थाय प्रवर्तते क्वचित्कर्मणि, तथा प्रकृतिरचेतनापि चेतनसंश्लेषमात्रेण प्रवर्तते, तस्मात्प्रकृतिपुरूषसंयोगतो जगत्सर्ग उपपद्यते। मैवम्! प्रकृते: पुरूषस्य च नित्यतया प्रकृतेश्च विभुत्वेन तयो: संयोगस्य सर्वदैव सत्वेन तस्याप्रयोजकत्वात्, अन्यथा सर्वदैव सर्गस्यैव हेतुसत्त्वेन प्रतिसर्गानुपपत्ति:, विषमश्च दृष्टांत, नहि सन्निधानादृते पुरूषस्यास्ति कश्चिद्विशेष:, स हि केवल चेतनो निर्व्यापार, ज्ञातृत्वादिकमपि न तस्य, तेषां विकाररूपत्वेनाविक्रिये तस्मिन्नसम्भवादिति हि भवदभिमतम् पंगोस्तु मार्गदर्शनतदुपदेशादयो विशेषा: सन्ति, अन्धस्यापि चैतन्यशक्तिमत्वेन पंगुविहितमार्गोपदेशाद्यवधारणाद्यस्त्येव, प्रकृतौ तु न कश्चिद् विशेष।

यत्तु- प्रकृतिसान्निध्यात्प्रकृतिधर्माध्यास: पुरूषे भवति, ततोऽयं सर्ग इति तदप्यसंगतम्। अस्मिन्नध्यासे हेतुभूतस्य सान्निध्यस्य दुर्निरूपत्वात्, यदि सान्निध्यं संयोगमात्रं तत्तु सर्वदाऽस्त्येवेति स एव दोष:, विकार विशेषरूपं तदिति वक्तुं न शक्यते, सर्वस्व विकारस्याध्यास हेतुकत्वेनाध्यासे तस्य हेतुत्वासंभवात्, तस्मादानुमानिकप्रधानकारणवादोऽनुपपन्न एवेति। यच्चोक्तं- सरूपोपादानकेनैव भाव्यमिति, तत्वभ्युपगम्यते, ब्रह्मात्मकप्रकृतिकारणत्वाभ्युपगममात्रेण न तत्र काप्यनुपपत्ति:, यद् ब्रह्मैव निखिलचेतनाचेतनशरीरकं विशेषणयो: सौक्ष्म्यस्थौल्यरूपावस्थाभेदेन कार्यावस्थां

---

[1] भगवद्गीता 7/6
[2] भगवद्गीता 10/8
[3] शारीरिकमीमांसा 1/1/5
[4] शारीरिक मीमासा 2/1/1
[5] शारीरकमीमांसा 2/2/1

कारणावस्थामप्युपगच्छतीति सारूप्यमेवो पादानोपादेययोरातिष्ठामहे वयम्। तत्सिद्धं मायाशब्दाभिलप्या मूलप्रकृतिः कृष्णशक्तिरिति, श्रूयते च- [1] 'ते ध्यानयोगानुगता अपश्यन्देवात्मशक्तिं स्वगुणैर्निगूढाम्' देवस्य-क्रीडनशीलपरमपुरूषस्य, शक्तिम्-लीलारसभूतसर्गनिर्वहणोपकरणभूतां, स्वगुणैनिगूढाम् सत्वादिभिर्गुणैर्व्याप्तामिति तदर्थः।

## तार्किकाणां परमाणुवादखण्डनम् –

मायायां कृष्ण शक्तित्व निरूपणेन जगत्सृजतः परमात्मनो मायैवोपकरणं न परमाणव इति व्यज्यते। एतेन- परमाणुकारणवादः सुदूरपरास्तः, पराभिमत परमाणुनामेवासिद्धेः, यत्तु-अनुमानेन तत्सिद्धिः, तथा च प्रयोगाः- 'विप्रतिपन्नं कार्यद्रव्यारब्धं महत्वे सति चाक्षुषत्वात्, चाक्षुषद्रव्यत्वाद्वा घटादिवत्'। 'विप्रतिपन्नं सावयवं चाक्षुषद्रव्यत्वात् घटादिवत्। 'अणुपरिमाणतारतम्यं कृचिद्विश्रान्तं परिमाण तारतम्यरूपत्वात्, महत्परिमाणतारतम्यवदिति'। तत्र प्रथमे कार्य द्रव्यारब्धत्वे सिद्धे तत्र च द्रव्ये कार्य द्रव्यत्वेन सावयवत्वसिद्धया, द्वितीये सावयवत्वसिद्धौ तेष्ववयवेषु महदवयवत्वेन सावयवत्वसिद्धया, तृतीये दृश्यमाने विश्रान्त्यनुपपत्या तत्सिद्धिरिति। तन्न। प्रथमे- विपक्षे बाधकाभावेन हेतोरप्रयोजकत्वात्, न च कार्यद्रव्यानारब्धत्वे चाक्षुषद्रव्यत्वानुपपत्तिः, उद्भूतरूपसम्बन्धादेव तदुत्पत्ते, उद्भूतरूपवत्तामेव चाक्षुषत्वे पलम्भाद्यथोपलम्भं योग्यतायाः स्वीकार्यत्वात्।

ननु- चाक्षुषता प्रकर्षेऽवयवसंख्याप्रकर्षः प्रयोजकतया द्रष्ट, लोके हि पदार्थो यथायथाऽधिकावयवस्तथातथा स्फुटतरं दृश्यते, यथायथा चाल्पावयवकस्तथातथा तु न स्फुटं दृश्यते, तथा चावयवसंख्यायाश्चाक्षुषताप्रयोजकतवं . सिद्धम्, यत्प्रकर्षयो प्रयोज्यप्रयोजकभावस्तयोरपि तद्भावात्, इत्थं च ना प्रयोजकतेति। मैवम्। तयोरपि तद्भावे मानाभावात्, तथापि द्रव्यारब्धत्वमात्रसिद्धा कार्यद्रव्यारब्धत्वासिद्धेः, सत्यामप्यवयवसख्याया भवदभिमतद्वयणुकस्याचाक्षुषत्वेन तथा नियमस्यासंभवाच्च, वस्तुतश्चाक्षुषताप्रकर्षेऽवयव संख्याप्रकर्षस्याप्रयोजकत्वाच्च, एकोऽपि हि केशः समीपस्थ. स्फुटमुपलभ्यते, स्थूलो वा सूक्ष्मो वा यथा यथा सन्निहितस्था तथा स्फुटतरमुपलभ्यते, स्थूलोवा सूक्ष्मो वा यथा यथा सन्नि हि तस्था तथा स्फुटतरमुपलभ्यते, यथा यथा विप्रकृष्टस्तथा तथा तु न तथा, सन्निहिते वस्तुनि स्थूलसूक्ष्मभेदेन जायमाने स्फुटास्फुटवभासभेदेऽपि नावयवसंख्याप्रकर्षो हेतु, स्फुटमनुपलभ्यमानः सूक्ष्मोऽप्यालोकप्रचुरदेशे स्फुटमुपलभ्यते, तदन्यदेव निमित्त चाक्षुषताप्रकर्षे। किञ्च- अन्यत्र चाक्षुष द्रव्ये द्रष्टं कार्यद्रव्यारब्धत्वमित्येतावतैवात्रापि यदि तत्सिद्धिरभिमन्यते, तथा सति महावयवारब्धत्वमपि सिध्येत, द्रष्टं हीदमपि सर्वत्र चाक्षुषे द्रव्ये, पार्थिवादित्रसरेणूनां सिद्धान्ते जलादिकार्यभूतपूर्वपूर्वभूतारब्धत्वात् सिद्धसाधन च, कार्यद्रव्यावयवकत्वसाधने कालेऽनैकान्त्यं, चाक्षुषतायास्त्यस्य सिद्धान्तिनाऽभ्युपगमात्। त्रसरेणुभ्योऽतिरिक्तं परमाणुमनभ्युपगच्छतां मते तेषामगुत्वेन महत्वाभावान्महत्व घटितहेतोरसिद्धिश्च। हेतोरप्रयोजकत्वादेव द्वितीयोऽप्यपास्तः।

---

[1] श्वेताश्वतरोपनिषत् 1/3

---

तृतीये च पक्षे- अणुपरिमाणपदेन त्रसरेणुव्यावृत्तः परिमाणविशेषो यदि विवक्षितस्तदा तस्येदानीमसिद्धा पक्षाप्रसिद्धिः, अपकृष्टमहत्परिमाणस्य, विवक्षायामुद्देश्यासिद्धि, तद्विश्रान्तेस्त्रसरेणावेव भवताऽप्यभ्युपगतत्वात्, यदि चापकृष्टपरिमाणमात्रं विवक्षितं तदा तद्विश्रान्तेर्दृश्यमान एवोपपत्तेस्तदसिद्धिरेव। हेतुशरीरे परिमाण विशेषणवैयर्थ्य च, तारतम्यत्वादित्येतावतैवाव्यभिचारात्। एवमवयवाप कर्षतारतम्यस्य क्वचिद्विश्रान्तत्वसाधनेनाऽपि नाभिमतसिद्धिः, दृश्यमान एव त्रसरेणौ तत्संभवात्। अविश्रान्तौ वा को दोषः? न च सर्षपमहीधरयो. परिमाणावैषम्यप्रसंगः, अवयवानन्त्यतौल्येऽप्याधिक्यन्यूनतयोः प्रमाणप्रतिपन्नयोरनपायात्। सत्ताश्रयव्यक्तीनामिव घटत्वाश्रयव्यक्तितः सतताश्रयव्यक्तीनां चाधिक्यम्, क्षणानां दिवसानां चानन्त्येऽप्यनन्तक्षणापेक्षयाऽनन्तदिवसेष्वाधिक्यम्, अनन्तदिवसापेक्षयाऽनन्तक्षणेषु न्यूनत्वं च भवताऽप्यभुपेयमेव। तस्मास्त्रसरेण्वतिरिक्त परमाणु कल्पनमप्रमाणिकमेव, परमाणूनामेवाप्रामाणिकत्वेतेषु तगत्कारणत्वं सुदूरपरास्तम्, तैस्तैः परमाणुभिरेव तत्तदारम्भकल्पने [1]'आकाशाद् वायुः, वायोरग्निः, अग्नेरापः, अद्भ पृथिवी'ति श्रुतिप्रतिपन्नक्रमोपमर्दः स्यात्।

**यादवप्रकाशपक्षनिरसनम् –**

कतिचन पुनरपौरूषेयनित्यनिर्दोषश्रुत्यैकावलम्बता स्वेष्वभिमन्यमाना प्रकृते कार्यकारणात्मना द्वैविध्यं गुणमयतामप्यभिप्रेत्यकारणावस्थायां मायाशब्दाभिलप्यत्वमिच्छन्तस्तस्याः कृष्णशक्तित्व वर्णयन्ति नाम। शक्तित्वं वर्णयतामेषामन्तत आशयस्तु शक्तेरम्या शक्तिमता सह स्वरूपैक्यसम्पादन एव। अखिलमेव जगद् चिदचिदात्मक ब्रह्मपरिणामात्मक तया ब्रह्मस्वरूपमेव ह्यभिमन्यन्ते सच्चिदापनंदस्वरूपस्यैव ब्रह्मणो लीलायै त्रिगुणभावमाकलयन्ति च। स चायं पक्षः सुदूरपरिहरणीय परम्य ब्रह्मणो हेयसम्बन्धापातमसहमानैस्त्रय्यन्तपथमनुसरद्भिरखिलैरपि, अनवद्य ब्रह्मस्वरूप कलकयतामता पक्षं नाद्रियामहे।

> [2]'नित्या च भगवच्छक्तिस्त्रिगुणा चिज्जडात्मिका।
> निर्विशेषा जीवमहतत्वादिक्षेत्रमव्यया।।
> इत्युक्ता प्रकृतिस्तस्याः साम्यस्थगुणचालन.।

मायाया लक्षणं तु गुणसाम्यम्, गुणत्रयसमावेशस्य मायायामिव तत्कार्येषु सत्त्वेऽपि गुणसाम्याभावान्नातिप्रसक्तिः. साम्यं चावैषम्यम्। विकृतिषु हि गुणानामुद्भावाभिभवभेदतो वैषम्यं नियतम्। प्रकृतिविकृति साधारण्येन मायात्वं तु रजोवत्वं तमोवत्त्व व। सेय माया

---

[1] तैत्तिरीयोपनिषत्- 2/1/1

[2] श्रीहरिवाक्यसुधासिन्धु. त 12 श्लोक 8,9

विकारान्प्रकरोत्यस्या इति व्युत्पत्तया प्रकृतिरित्युच्यते। कर्तरि तु न क्तिन् [1]स्त्रियांक्तिन् इत्यत्र [2]'अकर्तरि च कारकेसंज्ञायाम्' इत्यधिकारात्। यद्यपि अहंकारादितत्तद्विकारोपादानत्वं महदादिष्वपि। तथाप्यसंकोचान्निखिलविकारमूलत्वेन विकृतित्वासमानाधिकरणप्रकृतित्वात्केवलेन प्रकृतिशब्देनास्या निर्देश:। महदादिषु त्वस्यायं प्रकृतिरित्येव प्रयोग:। तदिदं व्यञ्जयितुमेव मूलप्रकृतिरितिक्वचित्प्रयुज्यते च। विद्याविरोधादविद्येत्युच्यते - यथा- [3]'अविद्यायां बहुधावर्तमाना वयं कृतार्था इत्यभिमन्यन्ति बाला:' [4]'अविद्याभूतवेष्टितो जीवो देहान्तरं प्राप्य लोकान्तर गच्छति' [5]'अविद्यायामन्तरेवर्तमाना: स्वयं धीरा: पण्डितं मन्यमाना:' [6]'अविद्यमानयाविद्यतया विश्वं खिलीकृतम्' [7]'अविद्ययामृत्युमेति विद्ययामृतमश्नुते' ' [8] अविद्ययामृत्युंतीर्त्वा विद्ययाऽमृतमश्नुते' [9]'अन्धं तम: प्रविशन्ति येऽविद्यामुपासते' [10] अविद्या तत्कार्यहीन: स्वात्मबन्धहर: आनन्दरूप: [11] अविद्ययैवोत्तमया . .. विद्या सम्प्राप्य ते , [12] अविद्यातरूसम्भूतबीजमेकं द्विधा स्थितम्। [13] अविद्यातिमिरातीतं. .आनन्दममलम् [14] अविद्यापाद: सुविद्यापादश्चानन्द पादस्तुरीयपाद: [15] अविद्याप्रपंचस्य नित्यत्वमनित्यत्वं वा कथम्, [16]अविद्यापञ्चपवैर्षा निषघ्नाति नृणां सदा, [17]अविद्या विद्यमानैव नष्टप्रज्ञेषु दृश्यते, [18] अविद्यांशे सुतादौ वा क: क्रम: सुखदु:खयो: इत्यादिप्रमाणवचनात्। विद्ययाविरोधश्च मोहकत्वात्। महदादि कार्यावस्थया न व्यञ्जत इत्यव्यक्तमित्यप्युच्यते। [19] 'अव्यक्तमक्षरे विलीयते' [20]अव्यक्तं चैवास्ययोनिं वदन्ति [21]अव्यक्तं भित्वाऽक्षरं भिनत्ति, [22]अव्यक्तं

---

[1] पा व्याकरणसूत्रम् 3/3/94
[2] पाणिनीयव्याकरणसूत्रम् 3/3/19
[3] मुण्डकोपनिषत् 1/2/9
[4] पैगलोपनिषत्- 2/9
[5] कठोपनिषत्- 2/5, मुण्डकोपनिषत् 1/2/8
[6] महोपनिषत् 4/133
[7] भवसंतरणोपनिषत् 3/1
[8] ईशावास्योपनिषत् 11
[9] ईशावास्योपनिषत्-9
[10] नृसिंहोपनिषत् 2,8
[11] महोपनिषत् 5, 109
[12] भवसंतरणोपनिषत् 3/8
[13] अक्ष्युपनिषत् 51
[14] त्रिपाद्विभूतिमहानारायणोपनिषत् 1/8
[15] त्रिपाद्विभूतिमहानारायणोपनिषत् 3/2
[16] भवसंतरणोपनिषत् 3/10
[17] महोपनिषत् 1/112
[18] महोपनिषत् 5/169
[19] सुबालोपनिषत् 2/2
[20] विष्णुहृदयोपनिषत् 1/4
[21] सुबालोपनिषत् 11/2
[22] सुबालोपनिषत् 14/1

।।जयश्रीस्वामिनारायण।।

श्रीहरिवाक्यसुधासिन्धौ उपनिषदां प्रभाव:

---

वाऽन्नमक्षरमन्नादम् , [1]'अव्यक्तं विशेद् ब्रह्मणि निरन्धनोवैश्वानरो यथा तस्मात् स्वरूपं भजति [2]'अव्यक्तात्तु पर: पुरूषो व्यापकोऽलिंग एव च यज्ज्ञात्वा मुच्यते जन्तु' [3]'अव्यक्तान् महत् महतोऽहंकार:' [4]'अव्यक्तान्मूलाविर्भावो मूलाविद्याविर्भावश्च' , अतस्तत्र तत्र ततस्ततो निखिलविकार प्रसूतिवर्णनेऽपि न विरोध:। सत्यप्यव्यक्ततमसोर्भेदे तमिमं सूक्ष्मं भेदमनादृत्य क्वचिदव्यक्तकारणवाद: प्रोक्तस्तम: कारणवादे न विरोधाय। नहि महदादिष्विषगुणवैषम्यमव्यक्ताक्षरतमस्सु, सत्यपि गुणसाम्ये लेशतोऽवस्थाभेद। यथा भूतलविनिक्षिप्तस्य बीजस्यांकुरावस्थात: प्राक् मृन्नि: सरणसलिलसंसेकाहितावयवशैथिल्योच्छूनतास्तिस्त्रोऽवस्थास्तथा महदादि सृष्टे: प्राक् देवेन सहैकीभूतस्य त्रिगुणद्रव्यस्याविभक्ततम: शब्दवाच्यस्य तमोऽक्षराव्यक्तशब्दवाच्याग्तिस्त्रोऽवस्था. सूक्ष्मा उत्तरोत्त रावस्थाहेतुभूतशक्तिविशेषात्मिका.। तत्र महतोऽनन्तर पूर्वावस्था गुणसाम्यापत्तिरूपाऽव्यक्तावस्था, ततोऽनन्तरपूर्वाऽपरिस्फुटगुणसाम्या चेतनसमष्टिगर्भाऽक्षरावस्था, अत एव क्षरणस्वभावत्वेऽप्यक्षरशब्देनोपचार:। चिद्गर्भत्वं यस्यामवस्थायां विवेक्तुमशक्यं तत्तम:। तदेवाक्षरावस्थाप्राप्त्युन्मुखं विभक्तं तम उच्यते। अतदुन्मुख तदेव परमात्मनैकीभूत सलिलविलीनलवणचन्द्रकान्तस्थ सलिलादिकल्पमविभक्तं तम उच्यते। तथा चोप्तस्य बीजस्यांकुरावस्थात: प्रागनभिव्यक्तस्य बीजत्वानुपमर्देनैव सूक्ष्मावस्थाभेदा इवैतेऽपीत्यव्यक्ततमसोर्नातीव भेद:। एतेन्- [5]'अव्यक्तमक्षरे लीयते, अक्षरं तमसि लीयते तम परे देवे एकीभवति' इति लयश्रुत्याऽक्षरादिविकारेऽवगम्यमाने महत्प्रभृतीनामेव विकारकोटौ गणना कथमिति शंकापरास्ता।

गुणवैषम्येन महदादि विकारा अस्या उत्पद्यन्ते, सत्वरजस्तमांसि गुणा: एते च प्रकृतेस्स्वरूपानुबन्धिस्वभावभूता: प्रकृत्यवस्थायामनुद्भूता: विकारदशायामुद्भूताश्च भवन्ति। सत्वं ज्ञानसुखेतत्संगं चोत्पादयति, तथा चोक्तं भगवता- [6]'तत्र सत्वं निर्मलत्वात् प्रकाशकमनामयम्। सुखसंगेन बध्नाति ज्ञानसंगेन चानघ , रज: रागतृष्णा संगान् कर्मसंगञ्चोत्पादयति। यथा- [7]'रजोरागात्मकं विद्धि तृष्णासंगसमुद्भवम्। तन्निबध्नाति कौन्तेय कर्मसंगेन देहिनम्' तमस्तु विपरीतज्ञानमनवधानमालस्य निद्राञ्च जनयति, यथा- [8]'तमस्त्व ज्ञानजं विद्धि मोहनं सर्वदेहिनाम्। प्रमादालस्य निद्राभिस्तन्निबध्नाति भारत'।। एतेषां समत्वे विकारास्समा अस्पष्टाश्च भवन्ति, विषमत्वे तु ते विषमा: स्पष्टाश्च भवन्ति। अर्थात्- प्रलयकाले प्रकृतेर्गुणा अनुद्रिक्ता भवन्ति अत एव तदात्वे प्रकृतेर्जायमाना विकारास्समा: अस्पष्टाश्च भवन्ति। नामरूपविभागानर्हत्वा देवांस्पष्टता तेषाम्। सृष्टिकाले

---

[1] त्रिपाद् विभूतिमहापनारायणोपनिषत् 3/9
[2] कठोपनिषत् 6/8
[3] त्रिशिखिब्राह्मणोपनिषत् 1/1
[4] त्रिपाद्विभूतिमहानारायणोपनिषत् 2/5
[5] सुबालोपनिषत्- 2/2
[6] श्रीमद्भगवद्गीता- 14/9
[7] श्रीमद्भगवद्गीता 14/8
[8] श्रीमद्भगवद्गीता 14/8

गुणाः परस्परं कृत्स्नतया वा उद्रिक्ता भवन्ति, तस्मादेवप्रकृतेर्जायमाना विकारा महदादयो विषमास्सष्टाश्च भवन्ति।

**प्रसंगप्राप्तसृष्टिनिरूपणम् –**

श्रीहरिवाक्यसुधासिन्धोः द्वादशतमे तरंगे स्वयमाह भगवान् स्वामिनारायणः सृष्टेः क्रमः तद्यथा-

[1]तत्रैकतमब्रह्माण्ड संभवः कथ्यते मया।
तेनानुमेयः सर्वेषामण्डानामपि संभवः।।
कृष्णः पुरूषरूपेण प्रधाने गर्भमीक्षणम्।
दधाराऽथ महत्तत्वं चित्तात्मकमभूत्ततः।।
तस्माद्भूदहंकारस्त्रिगुणस्तत्र सात्विकात्।
मन इन्द्रियदेवाश्च राजसान्द्रियासवः।।
तामसाच्छब्दतन्मात्राद्वारा काशमजायत।
ततः स्पर्शस्ततो वायुस्ततो रूपं ततोऽनलः।।
ततो रसस्ततश्चापस्ततो गंधस्ततश्च भूः।
भिन्न भिन्न स्वभावानि तत्वान्येतानि देवताः।।
अन्तर्यामितया कृष्णाविष्टान्येतानि सर्वशः।
संहत्य जीवेशतनूः स्वस्वांशैः ससृजुस्ततः।।

प्रकृतेर्विकारेषु सर्वप्रथमो महान् वर्तते, अध्यवसायजनकत्वमस्य लक्षणम्। अध्यवसायश्च निश्चयात्मकं ज्ञानम्। महतोऽहंकारो जायते, स च गुणभेदा त्रिधा-वैकारिकः तैजस. भूतादिरिति। सस्मार च भगवान् पराशरः-

[2]वैकारिकस्तैजसश्च, भूतादिश्चैव तामसः।
त्रिविधोऽयमहंकारो महत्तत्वादजायत।।

क्रमेणेमे एव सात्विकाहंकारो राजसाहंकारस्तामसाहकारश्चेति कथ्यन्ते। त्रिविधेष्वहंकारेषु सात्विकाहंकाराज्ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि मन इत्येकादश सख्याकानि जायन्ते। सात्विकाहंकारजन्यत्वादिमानि लघुप्रकाशसुखमयानि भवन्ति। सात्विकादहंकारादिन्द्रियाणामुत्पत्तिरूक्तेरिन्द्रियाणां तैजसत्व प्रतिपादकानां मतमपि निरस्तम्। भगवान् पराशरोऽपि -

---

[1] श्रीहरिवाक्यसुधासिन्धुः त.12 श्लोक 29-34
[2] श्रीविष्णुपुराण- 1/2/35

"तैजसानीन्द्रियाण्याहु: देवा वैकारिका दश।
एकादशं मनश्चात्र देवा वैकारिक स्मृता:।।"

इति श्लोके पूर्वपक्षमनूद्य सिद्धान्तरूपेणेन्द्रियाणां सात्विकतामपीपृथत्। भगवान् मनुरप्याह-
[1]'तेषां त्ववयवान् सूक्ष्मान्, षण्णामप्यमितौजसाम्।
सन्निवेश्यात्ममात्रासु, सर्वभूतानि निर्ममे।।'

सूक्ष्मानिन्द्रियाणामंशानात्ममात्रासु सन्निवेश्य सर्वभूतानि ससर्जेत्यर्थ.। भगवता मनुनेन्द्रियाणां सूक्ष्मत्वकथनात्-

[2]'शरीरं यदवाप्नोति, यच्चाप्युत्क्रामतीश्वर:।
गृहित्वैतानि संयाति, वायुर्गन्धानिवाशयात्।।'

इत्यनुसारेण जीवस्येन्द्रियैस्सह शरीरान्तरे प्रवेशात् [3] 'अणवश्च' इति बाद रायणसूत्राच्चेन्द्रियाणामणुत्ववाद एव श्रेयान्, तेषां षट्त्वं संख्याऽपि 'मन षष्ठानीन्द्रियाणि' इत्यनुसारेणेन्द्रियसामान्योपलक्षिका तेषामेकादशत्वमपि एकादश प्रकारपरम् नत्वेकादश संख्यापरम्, प्रतिशरीरमिन्द्रियाणां भिन्नत्वात्।

**अथभूतोत्पत्तिक्रमनिरुप्यते–**

तामसाहंकाराच्छब्व तन्मात्रं तस्मात् शब्दगुणक आकाश· तस्मात् स्पर्शतन्मात्र स्पर्शगुणको वायु: रूपतन्मात्रं च तस्माद्रूपगुणकं तेज: रसतन्मात्रं च तस्माद्रसगुणक जलम् गन्धतन्मात्रं च तस्माद्गन्धगुणवती पृथिवी चाजायत। तन्मात्रोत्पत्तेरनन्तर भूतोत्पत्ते कथनं च भूतोत्पत्ते: क्रमज्ञापनाय, तन्मात्रोत्पत्तिक्रमोऽस्मदाचार्याणामतीवादरणीय· निदान चात्र [4]'अष्टौ प्रकृतय: षोडष विकारा: शरीरे तस्यैव देहिन:' इति श्रुते· स्वरससिद्धि। अष्टौ प्रकृतय: इत्यनेन प्रकृतिर्महान्, अहंकार:, पञ्चतन्मात्राणि च गृह्यन्ते। अन्ये च षोडश विकारा एव।

भूतादेरहंकाराच्छब्दतन्मात्रं तस्मादाकाश: आकाशात्स्पर्शतन्मात्र तस्माद् वायु.. वायो: रूपतन्मात्रं तस्मात्तेज: तेजसो रसतन्मात्रं तस्माज्जलम्, जलाद्गन्धतन्मात्रम् तस्मात् पृथिवी

---

[1] मनुस्मृति 1/16
[2] श्रीमद्भगवद्गीता- 15/8
[3] शारीरकमीमांसा- 2/4/6
[4] गर्भोपनिषत्-3

चोत्पद्यते इत्यपि केचन आहु:। परंतु विचारणीयमिदम् यतो- 'अष्टौ प्रकृतय षोडश विकारा' इत्यत्र इन्द्रियाणामिव भूतानामपि विकारत्व मात्रोक्ते:, 'श्रीविष्णुपुराणे- [1]'आकाशस्तु विकुर्वाण: स्पर्शमात्रं ससर्ज ह

इत्यारभ्य स्पर्शतन्मात्रादिकारणत्वेनोक्तानामाकाशादिपदार्थानां तन्मात्र लक्षणभूतत्वं श्री पराशरेण भगवता विवक्षितमिति व्याख्यानात्' इत्याह वरवरमुनि: तत्वत्रयव्याख्यायाम्। किञ्च भूतानामकारणत्वस्वीकारे 'अष्टौ प्रकृतय: षोडश विकारा' इति श्रुते र्व्याकोप्य विहते.। मोक्षधर्मस्य याज्ञवल्क्यजनकसंवादे पञ्चमहाभूतानां तन्मात्रेभ्योऽभेदं स्वीकृत्य 'अष्टौ प्रकृतय.' इति श्रुते: सम्यङ्निर्वाहमकार्षीत् भगवान् वेदव्यास: [2]'अष्टौ प्रकृतय: प्रोक्ता विकाराश्चैव षोडश' इत्यारभ्य' [3]मन: षोडशमित्याहुरध्यात्मगति चिन्तका: इत्यन्तम्। भगवान् मनुरपि 'मनोबुद्धिरहंकारा: खानिलाग्नि जलानिभू:' इत्यारभ्य 'विकारा षोडश स्मृता·' इत्यन्तं तथैव निर्वहति। अस्यां स्मृतौ मन्तव्यतया मन: शब्देन प्रधानतत्वमुच्यते, संकल्पशब्दश्च तत्कारणं मनो लक्षयति अत एव भूतानां कार्यत्वमेव स्वीकर्तव्यम्।

## अथेन्द्रियाणामुत्पत्तिक्रम: –

यथांकुरोत्पत्तौ जलं बीजस्य सहकारी भवति, यथा वा ज्वलने वायुरग्ने: सहकारी भवति तथैव सत्वतमोभ्यामिन्द्रियाणाम्भूतानाञ्चोत्पत्तौ रजोगुण: सहकारी भवति, अत्रास्य सहकारित्वञ्च तमोंशस्य सत्वांशस्य च रजसा प्रेरकत्वम्। तथा हि- सात्विकाहंकार इन्द्रियोत्पादनकाले शब्दतन्मात्र सहाय्येन श्रोत्रम्, स्पर्शतन्मात्रसहाय्येन त्वचम्, रूपतन्मात्रसहाय्येन चक्षु: रसतन्मात्रसहाय्येन रसनां, गन्धतन्मात्रसहाय्येन घ्राणं स सृजति।

तेषां तेषां तन्मात्राणां सहाय्यप्रयोजनं चास्ति यत्, श्रोत्रेन्द्रियं शब्दमेव, त्वगिन्द्रियम् स्पर्शमेव, चक्षुरिन्द्रियं रूपमेव, रसनेन्द्रियं रसमेव, घ्राणेन्द्रियं गन्धमेव गृह्येतेति। एवमेव श्रोत्रेन्द्रिय सहाय्येन वाचम्, त्वगिन्द्रियसहाय्येन पाणिं, चक्षुरिन्द्रियसहाय्येन पादम्, रसनेन्द्रियसहाय्येनोपस्थम्, घ्राणेन्द्रिसहाय्येन च पायुं सृजति। कर्मेन्द्रियाणां ज्ञानेन्द्रियाणां च सहकारि मन: सहकारिणं विनैव सृजतीति तत्त्वविदो वदन्ति।

## नैयायिकाभिमत इन्द्रियाणामभौतिकत्व प्रतिपादनम् –

नैयायिका इन्द्रियाणाम्भौतिकत्वं स्वीकुर्वन्ति, तन्नोचितम्, शास्त्रविरूद्धत्वात्, शास्त्रेषु देवा वैकारिकास्स्मृता:' इत्यनुसारेणेन्द्रियाणां सात्विकाहंकारजन्यत्वमेव स्वीकृतम्, न च मोक्षधर्मे 'शब्द: श्रोत्रं तथा खादि त्रयमाकाशसम्भव' मित्यादिनेन्द्रियाणां भौतिकत्व स्वीकर्तव्यमिति वाच्यम्, भूतानामिन्द्रियाणामाप्यकत्वात्, आप्यायकत्वं च पोषकत्वम्। न च

[1] श्रीविष्णुपुराण 1/2/39
[2] मोक्षधर्म- 310/10
[3] मोक्षधर्म- 310/15

।।जयश्रीस्वामिनारायण।।

श्रीहरिवाक्यसुधासिन्धौ उपनिषदां प्रभाव:

---

[1] 'अन्नमयं सौम्यमन: आपोमयप्राणस्तेजोमयी वा' गितिश्रुत्यनुसारेण भूतानि प्रतिसात्विकाहंकारस्याप्यायकत्वं भूतानां चोपादानत्वं स्वीकर्तव्यमिति वाच्यम्, 'देवा वैकारिकास्स्मृता:' इत्यनुसारेण इन्द्रियाणि प्रति सात्विकाहंकारस्यैवोपादानत्वसिद्धे:।

प्रकृतेरूद्भूतान्यपि महदादीनि तत्वानि कार्यकराणि न हि भवन्ति, यथा भित्ति निर्मिमीक्षु: मृद्बालुकाजलान्येकीकृत्य भित्तिं निर्माति तथैवेश्वरोऽपि महदादीनि सम्मेत्यतैरण्ड निर्माय तदन्तर्ब्रह्माणं सृजति, तथा चोक्तम्-

[2]'नानावीर्या: पृथक्भूतास्ततस्ते संहतिं विना।
नाशक्नुवन् प्रजां स्त्रष्टुमसमागम्य कृत्स्नश:।।
समेत्यान्योन्यसंयोग परस्पर समाश्रया:।
एकसंघात लक्षाश्च सम्प्राप्यैकमशेषत:।।
महदादि विशेषान्ता ह्यण्डमुत्पादयन्ति ते।'

परमात्मन: सृष्टिर्द्विधा भवति सद्वारकसृष्टिरद्वारकसृष्टिश्च, परमात्मना साक्षात् क्रियमाणा सृष्टिरद्वारकसृष्टि:, ब्रह्मणोऽन्तर्यामित्वेन क्रियमाणासृष्टिस्सद्वारकसृष्टि:, ब्रह्माण्डस्य महदादीनां चतुर्मुखस्य च सृष्टिं परमात्मा साक्षात्करोतीति केचिदाचार्या:, ब्रह्माण्डान्तर्गताना देवमनुष्यादीनां सृष्टिं परमात्मा [3]'मत्तस्स्मृतिर्ज्ञानमपोहनं च' इति न्यानेन ब्रह्मान्तर्यामित्वेन करोति। अत एवंय परमात्मन: सद्रारक सृष्टि: तथा चाह भगवान् मनु:-

[4]सोऽभिध्याय शरीरात्स्वात् सिसृक्षुर्विविधा: प्रजा:।
अप एव ससर्जादौ तासु वीर्यमपासृजत।।

किञ्च-

[5]यत्किञ्च सृज्यते येन सत्वजातेन वै द्विज।
तस्य सृज्यस्य सम्भूतौ तत्सर्वं वै हरेस्तनु:।।

पिल्लै लोकाचार्या: अपि तत्वत्रये लिखति यत्- 'अण्डमण्डकराणि च स्वयमुत्पादयति अण्डान्तर्गतानि वस्तूनि चेतनान्तर्योमिभूत्वा सृजति। अण्डानि चानेकानि चतुर्दश

---

[1] छान्दोग्योपनिषत् 6/5/4, 6/6/5
[2] श्रीविष्णुपुराण 1/2/51-53
[3] श्रीमद्भगवदगीता- 15/15
[4] मनुस्मृति: 1/8
[5] श्रीविष्णुपुराणम् 1/22/38

लोकयुतान्युत्तरोत्तरं दशगुणैस्सप्तभिरावरणैरावृतानीश्वरस्य क्रीडाकन्दुकस्थानीयानि जलबुद्बुदवद्युगपत्सृष्टानि च भवन्ति।

भूतेषु मध्य आकाशोऽवकाशहेतु:, तेज: पचनादि हेतु:, जल सेचनपिण्डीकरणादिहेतु: पृथिवी धारणादिहेतुश्च, श्रोत्रादीनां पञ्चानां ज्ञानेन्द्रियाणां क्रमेण शब्दादिपञ्चकग्रहणं कृत्यम्, वागादीनां पञ्चानां कर्मेन्द्रियाणां विसर्गशिल्पगत्युक्तय: कृत्यानि, मनस्तुसर्वेषामेषां साधारणम्, गुण विनिमय: पञ्चीकरणेन।

**पञ्चीकरणप्रक्रिया –**

भूतान्तरेषु भूतान्तरगुणानां संक्रमणं च पञ्चीकरणप्रक्रियया भवति। पञ्चीकरणप्रक्रिया नाम- भूतानि द्वेघा द्वेघा विभज्य, प्रत्येकेषां भागमेकं चतुर्धा विभज्य भूतान्तरेषु संयोजनम्, एवं पञ्चभूतेषु प्रत्येकेषु स्वीयो भाग अर्द्ध: भूतान्तराणां प्रत्येकेषां भाग: अष्टमांशो भवति, यथा पृथिवि=1/2 + जलम् 1/8 + वायु: 1/8 + आकाश: 1/8, एवंभूतान्तरेष्वपि ज्ञेयम्, तथा चोक्तं पुराणे-

'एवं जातेषु भूतानि प्रत्येकन्तु द्विधा तत:।
चतुर्धा भिन्नमेकैकमर्द्धमर्द्धन्तथा स्थितम्।।
व्योम्नोर्द्धभागश्चत्वारो वायुतेज: तथा-भुवाम्।
अर्द्धानि यानि वायोस्तु व्योमतेज: पयोभुवाम्।।

पञ्चीकरणादेव आकाशेऽपि जायमाना कृष्णरूपप्रतीतिरपि वास्तविकी, [1] यदग्ने रोहितं रूपं तेजसस्तद्रूपं, यच्छुक्लं तदपाम्, यत्कृष्णं तदन्नस्य इति श्रुतिरेव पृथिव्या: रूपकृष्णमिति वक्ति। आहुश्चात्र श्रीभाष्यकारा अपि- [2] "यदग्ने रोहितं रूपं तेजसस्तदपामपि रूपं शुक्लं पृथिव्याश्चेत्यग्नेरेव त्रिरूपता श्रुत्यैव दर्शिता तस्मात् सर्वे सर्वत्र संगता:"

न च पञ्चीकरण–प्रक्रिया तु श्रुतिषु नोपलभ्यत इति वाच्यम्, यथा भूतत्रयस्योत्पत्तिवर्णनं भूतपंचकस्य, भूतसप्तकस्य चोपलक्षणं स्वीक्रियते तथैव त्रिवत्करणमपि पञ्चीकरणस्य वा सप्तीकरणस्य वोपलक्षणमिति समञ्जसम् सर्वम्।

**प्रलयनिरूपणम् –**

[3] 'लोकवत्तुलीलाकैवल्यम्' इति सूत्रानुसारेण लीलायै विश्वरचना कृत्वा क्रीडति प्रभु, परन्तु समेषां कालनिर्धारणं वर्तते, तदनन्तरं प्रलयो भवति। यथा चाह भगवान्स्वामिनारायण:-

---

[1] छान्दोग्योपनिषत्- 6/4/1
[2] श्रीभाष्यम्- जिज्ञासाधिकरण
[3] शारीरकसूत्रम् 2/1/33

।।जयश्रीस्वामिनारायण।।

श्रीहरिवाक्यसुधासिन्धौ उपनिषदां प्रभाव:

---

[1]विराड्देही तु वैराज: सात्विक: सर्वपालक:।
हिरण्यगर्भ: सूत्रांगो जगत्स्त्रष्टा च राजस:।।
तमसोऽप्याकृतात्मेश: सर्वसंहारकारक:।
वैराजस्यायुष: कालो द्विपरार्द्धावधि: स्मृत:।।
सहस्त्रयुगपर्यन्तं दिनं रात्रिश्च तावती।
तस्य यावद्दिनं तावत् त्रिलोक्या वर्तते स्थिति.।।
एकस्मिन् वासरे तस्य चतुर्दश चतुर्दश।
भवन्तीन्द्राश्च मनवो जगत. स्थितिहेतव.।।
त्रैलोक्यं नाशमायाति तद्रात्रौ प्रलयेऽखिलम्।
दैनं दिन: स प्रलय: प्रोक्तो नैमित्तिकस्तथा।।
द्विपरार्द्धावसाने तु विराड्लोका चतुर्दश।
प्रलयं यान्ति सांवर्त्तपवनानलवारिभि:।।
महदादीनि तत्वानि प्रधानपुरूषौ तथा।
प्रकृतौ लयमायान्ति प्राकृत: प्रलयस्त्यसौ।।
कृष्णेच्छया सा प्रकृतिर्लीयतेऽक्षर तेजसि।
यदा तदासौ प्रलय आत्यांतिक इतिरित:।।
एवं विश्वभवादीनि यो विजानाति तत्वत:।
तस्य कृष्णे भवेद्भक्तिर्विरक्तिरितरत्र च।।
प्रलये कृष्ण भक्तास्तु भगवद्धाम यान्ति हि।
मायायामेव लीयन्ते जीवा अन्ये तु सर्वश:।।

**अयमाशय: —**

वैराजपुरूषस्याऽऽयु: कालो द्विपरार्धावसान: कथितम्। एतद् ब्रह्माण्डस्य यो ब्रह्मा तस्यैकदिवस: सहस्त्रवाराऽऽवृत्तकृतादियुगचतुष्ट्याऽवसान: तावती तस्य सहस्त्रयुगपर्यन्ता च रात्रि:, तस्य यावत्कालपर्यन्तं दिनं तावत्कालपर्यन्तं त्रिलोक्या: स्थिति:, 'द्वादशवर्षसहस्त्राणि चतुर्युगं विदुर्जना' इति मनु: सूर्यसिद्धान्तो भागवतश्चाह। एक सप्तति चतुर्युगे एकेन्द्र एको मनुश्च स्वाधिकारात् प्रच्यवत:, चतुर्दशमनव: पर्यावर्तन्ते एक दिवसे, तत्र प्रतिक्षणं प्रलयो नित्यप्रलयो भूतानामाकस्मिको भवति, एक दिवसे ऋषिदेवमनुपुत्रषट्कस्थ भगवदवताराश्चाऽत्र जायन्ते, ब्रह्मणो निशायां सत्यां प्रलये सति पातालादिस्वर्गान्ता दश लोका नाशमायान्ति, स दैनंदिननामको नैमितित्तक: प्रलया। ब्रह्मण: आयुष· समाप्तौ विराट्लोका:=ब्रह्माधारा: पातालादिसत्यन्ता: चतुर्दश लोका: प्रलयकालभवै: सांवर्तपवनानलवारिभि: प्रलयं यान्ति, पवनादयश्च कारणेषु सूक्ष्मभूतेषु विशन्ति, ततो यथा निर्माणं यथायुर्ब्रह्मजनकवैराजतत्वानां महदादीनामपि कार्यप्रलयप्रयोज्यकारणप्रलयो मध्यमहाप्रलयो जायते। प्रधानपुरूषौ च महामायायां मूलप्रकृतौ लयं यात:। तदाऽयम् अन्तिम महाप्राकृतप्रलयो जायते। श्रीहरिकृष्णेच्छया सा

---

[1]श्रीहरिवाक्यसुधासिन्धु· त 12, श्लोक 36-45

मूलमाया प्रकृतिरक्षर ब्रह्मण: प्रकाशे लीयतेऽदृश्या भवति दिवसे रात्रिरिवेति सोऽयमात्यन्तिकप्रलय:, यद्वाज्ञानभक्त्यादिभिर्नित्यमोक्षोऽप्यात्यान्तिक प्रलय इति। द्विपरार्धकालस्तु-

'एकं दशं शतं चैव सहस्त्रमयुतं तथा।
लक्षं च नियुतं चैव कोटिरर्बुदमेव च।।
वृन्दं खर्वो निखर्वश्च शंख: पद्मश्च सागर:।
अन्त्यं मध्यं परार्ध्यं च दशवृद्ध्या यथाक्रमम्।।

सुबालोपनिषदि प्रलयवर्णनं यथा प्राप्यते तथैव क्रम: यथा- [1] 'पृथिव्यप्सुप्रलीयत आपस्तेजसि प्रलीयन्ते तेजो वायौ विलीयते वायुराकाशे विलीयत आकाशमिन्द्रियेष्विन्द्रियाणि तन्मात्रेषु तन्मात्राणि भूतादौ विलीयन्ते, भूतादिर्महति विलीयते महानव्यक्ते विलीयतेऽव्यक्तमक्षरे विलीयतेऽक्षरं तमसि विलीयते तम: परे देव एकीभवति परस्तान्न सन्नासन्ना सदसदित्येतन्निवार्णानुशासनमिति' एवं प्रकारेण परमात्मान ऽभवित विशेषरूपिणी, जीवानां समक्षत: परमात्मस्वरूपतिरोधानकर्त्री प्रधानप्रकृतिअविदविद्याह्यनीशादि शब्दवाच्या माया भगवत्पारतन्त्र्यमनुगृहणन्भगवत्प्रीत्यै तदादेशानु सारेण कार्याणि कुर्वन्तीति।

।।इति मायास्वरूपनिरूपणम्।।

[1] सुबालोपनिषत्- 1/2

## ।।अथ ब्रह्मस्वरूपनिरूपणम्।।

ब्रह्मशब्देन भगवद्धामाक्षरस्य ग्रहणं भवति इति तु प्रथमाध्याये प्रतिपादितम्। श्रीहरिवाक्यसुधासिन्धौ भगवता श्री स्वामिनारायणेन प्रतिपादितमस्ति यत् नैकेषु स्थलेषु ब्रह्मशब्देन परब्रह्मण: वर्णनं प्राप्यते शास्त्रेषु परंतु [1]'अक्षरात्परत पर' [2]'अक्षर ब्रह्मयत्परम्' [3]'यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तम' इत्यादि श्रुतिस्मृतिप्रमाणै ज्ञायते यत् परंब्रह्म परमात्मान· शरीरभूतमक्षरमिति तदेव ब्रह्मशब्देनोच्यते उद्धवसम्प्रदाये। महामुनिमुक्तानन्दस्वामिना पृष्टे सति भगवद्धामस्वरूपमाह भगवात्स्वामिनारायण, स्वयमेव-

[4]'नित्यमप्राकृतं दिव्यं सच्चिदानन्दमक्षरम्।
ब्रह्माख्यं धाम तत्प्रोक्तं कृष्णस्यात्यन्तमुज्ज्वलम्।।
द्रष्टान्तं कथयाम्येकमनुमेयं च तेन तत्।
यदा काचमयीभूमि: स्यादियं सचराचरा।।
तारा नभसि यावत्यस्तावन्त: स्युश्च भास्करा·।
तदा यथा तैर्द्योतित सा भूर्भूरिप्रभोज्ज्वला।।
तथा तेजोमयं धाम ज्ञेय तदनिरूपणम्।
समाधौ तच्च पश्यन्ति केचिद् भागवता इह।।
हित्वा स्वदेहं भुवि कृष्णभक्ता, प्रयान्ति तद्धाम सुरादिवन्द्यम्।'

नित्यम्=उत्पत्तिध्वसाऽप्रतियोगि सनातनं च, सत्=त्रिकालाबाध्यम् आतनं स्वरूप यस्य तत्, अप्राकृतम्=प्रकृति· महामाया तत्कार्यादि च, तद्विकारस्वरूप प्राकृत तद्भिन्नम्-अप्राकृतम्, प्रकृतिसंसर्गलेपपराभवाऽऽधानतादात्म्याद्यनवच्छिन्न स्वरूपसद् दिव्यभगवत्प्रकाशात्मकम् प्रकाशघनं सूमूर्त चामूर्त च सुघटमूर्तिव्यापकप्रकाशतत्व च।

[1] मुण्डकोपनिषत्- 2/1/4
[2] कठोपनिषत्- 3/2
[3] श्रीमद्भगवद्गीता- 15/18
[4] श्रीहरिवाक्यसुधासिन्धु. त 12 श्लोक 47-51

---

दिव्यम्=कान्तिपराकाष्ठाश्रयम्, तत्तत्सजातीयपराकाष्ठापन्नयावदुक्तोपपन्नत्वं दिव्यत्वम्, यथा शुक्लादिरूपं तत्तद्रूपीयपराकाष्ठापन्नं निरतिशयं निम्नसमानतावर्जितं रमणीयक रूपणीयकं यद्रूपांशात्तदन्वितानां सुरूपाणि भवन्ति एवं विधम्। यत्सौन्दर्यात् तदन्विताना सौन्दर्याणि भवन्ति एवं विधम्, यल्लावण्यात्तदन्विताना लावण्यानि भवन्ति, यन्माधुर्यात्तदन्वितानां माधुर्याणि भवन्ति, यदौज्ज्वल्यात् तदन्वितानामौज्ज्वल्यानि भवन्ति, यत्सौगन्ध्यात्तदन्विताना सौगन्ध्यानि भवन्ति, यत्सौष्ठवात्तदन्वितानां सौष्ठवानि भवन्ति, यत्सारुप्या तदन्विताना सारूप्याणि भवन्ति एवं विधम्। तथा च स्वरूपे, गुणेषु, शक्तिषु, सामर्थ्येषु, क्रियाविशेषेसु, संसर्गेषु, पदार्थेषु, मूर्तेऽमूर्ते च तत्तदीययावदुक्तयुक्तपराकाष्ठोपपन्नता तत्र दिव्यता, भगवत्साम्येन सर्वत्राऽसमाननिरतिशयाऽनवधिक तत्तत्तमभावेन चारूसारसत्वोत्तमश्रेष्ठपराऽधिकोत्कृष्टाऽतिशयपराकाष्ठासर्वोपरिस्वच्छप्राचुर्यबहुपुष्पकलादिसाम्याद्य नवधिकाऽर्थसंभृतत्वम् पारिभाषिकं दिव्यत्वम्। सच्चिदानन्दम्=सत्वं शाश्वत स्वरूपभावत्वं, यद्विधतत्वं तद्विधशाश्वत्वम्, शाश्वतभूधात्वर्थत्वं, निरुपाख्यप्रतिद्वन्द्विसततस्थत्वं, यावदेकरूपात्मकत्वं, एकरूपविद्यमानत्वं, सत्प्रतीतिविषयत्वम्, अस्तीत्येकान्तव्याप्तिमत्वम्, संकोचविकासावस्थारहितसार्वदिकैकरूपवर्तमानत्वं, शाश्वतैकभावत्वम्, [1]'अस्तीत्येवोपलब्धव्यस्तत्वभाव: प्रसीदति' इत्यादिभि· प्रतिपाद्यविषत्वं च। चित्वं=ज्ञानत्वं, चेतयितृशक्तिकत्वं, प्रतिफलनचलनोदरकत्वं, विषयस्वागतिकचयत्वं, प्रतिमाप्रकाशित्वम्, विद्लृवाच्यार्थत्वं, साक्षाद्भासात्वं, भासकलहरीहृत्वं, संज्ञकताऽऽधानत्वम्, अप्रकाशाऽचिदज्ञानाऽविद्याऽऽन्ध्यप्रतिद्वन्द्वि प्रमात्वम्। आनन्दत्वम्=शाश्वतसुखत्वं, मोदप्रमोदलहर्याधानत्वं, प्रीतितरंगित्वं, प्रेमवर्षित्वं, स्नेहलग्नित्वं, दु:,खशोकोद्वेगोत्तापपीडाऽऽत्यादिप्रतिद्वन्द्वि सततस्वादकोशत्वम्, आनन्दपदवाच्यत्वमिति। सत्ताचैतन्याऽऽनन्दादिधर्मवत्। अक्षरं=क्षरणवर्जितम्। क्षरणं गुणतो धर्मत· स्वरूपतश्च यस्य नास्ति, अक्षाणामिन्द्रियाणान्त: करणानां र शक्तिदम्। अनन्तम्=देशकाल वस्त्वाद्यपरिच्छिन्नम्, अन्त· स्वरूपतो ध्वंस:, गुणाऽभाव:, शक्त्यभाव:, अस्तित्वाभाव:, सीमभाव:, अवयवजन्यत्वम्, असर्वात्मकत्वं च, तानि न सन्ति यस्येत्यनन्तम्। उज्जवलम्=सर्वप्रकाशाधानं, श्रीहरिकृष्णस्य श्रीहरेर्धाम ब्रह्मनामकं ब्रह्ममहोलाभिधम्, ब्रह्मलोकात्मकम्, मूर्तममूर्तं च। प्रोक्तम्=श्रुतिस्मृतिपुराणाद्यैर्वर्णितम्, तथाहि [2]विद्ययाऽमृतमश्नुते इति अमृतपदम्, [3]'अमृतत्वं भजन्ते' इति मोक्षपदम्, [4]'मोदते स्वर्गलोके' इति शाश्वतस्वर्गम्, [5]'अनन्तलोकाऽप्ति·' इति अनन्तलोक:, [6]'ब्रह्मलोकेमहीयते' [7]'अक्षरंब्रह्म यत्परम्' [8]'तदविष्णो: परमं पदम्' [1]'ऋतं बृहत्, सत्यं ब्रह्म' 'गुह्य ब्रह्मसनातनम्'

---

[1]कठोपनिषत् 2/3/13
[2]ईशावास्योपनिषत्-11
[3]कठोपनिषत् 1/1/13
[4]कठोपनिषत् 1/1/12
[5]कठोपनिषत् 1/1/14
[6]कठोपनिषत् 1/2/17, 1/3/16
[7]कठोपनिषत् 1/3/2
[8]कठोपनिषत् 1/3/9

---

[2]'तदेवशुक्रं तद्ब्रह्म तदेवाऽमृतमुच्यते' [3]'तस्मिल्लोका: श्रिता: सर्वे' [4]'तस्य भासा सर्वमिदं विभाति' [5]'तदु नात्येति कश्चन' [6]'तेषामेवैष ब्रह्मलोको ,येषां तपो ब्रह्मचर्य सत्यं च प्रतिष्ठितम्। तेषांमसौ विरजो ब्रह्मलोको न येषु जिद्ममनृतं न माया चेति' [7]'विज्ञायाऽमृतमश्नुते' 'परमेवाऽक्षरं प्रतिपद्यते' [8]'शुभमक्षरं वेदयते' [9]'उन्नीयते ब्रह्मलोकम्' [10]'अन्वेतिविद्वान् यत्तच्छान्तमजरममृतमभयं परं चेति' [11]'परा यया तदक्षरमभिगम्यते' [12]'यत्तदप्रेश्यमग्राह्यमगोत्र मवर्णमचक्षु: श्रोत्रं तदपाणिपादं नित्य विभु सर्वगत सुसूक्ष्मं तदव्ययम्, यद् भूतयोनिं परिपश्यन्ति धीरा: [13]'तपसा चीयते ब्रह्म' [14]'एष व: पन्था: सुकृतस्य लोके'

[15]'येनाऽक्षरं पुरूषं वेद' [16]'तथाऽक्षराद्विविधा सौम्य भावा: प्रजायन्ते' [17]'अक्षरात्परत: पर.' [18]'ब्रह्मपराऽमृतम्' [19]'आवि: सन्निहितं गुहाचरं नाम महत्पदम् अत्रैतत्समर्पितम्, एतत्प्राणन्निमिषश्च यदेतज्जानथ सद्सद्वरेण्यं परं विज्ञानात् यद् वरिष्ठम् प्रजानाम्' आवि:- स्वयंप्रकाशैकरसस्वरूपम्। [20]'यदर्चिमद्यदणुभ्योऽणु च यस्मिल्लोका निहिता लोकिनश्च, तदेतदक्षरं ब्रह्म स प्राणस्तदुवाङ्मन:, तदेतत्सत्यं तदमृतं यद् वे द्धव्यं सौम्य विद्धि' [21]'लक्ष्यं तदेवाक्षरं सौम्य विद्धि' [22]लक्ष्यं तदेवाक्षरं सौम्यविद्धि [23]"अमृतस्यैष सेतु:' [24]'दिव्ये ब्रह्मपुरे ह्येष व्योम्नि आत्मा प्रतिष्ठत:' [1]'हिरण्मये परे कोशे विरजं ब्रह्म निष्कलं

---

[1] कठोपनिषत् 2/2/2
[2] कठोपनिषत् 2/2/6,8
[3] कठोपनिषत् 2/2/8
[4] कठोपनिषत् 2/2/15
[5] कठोपनिषत् 2/3/1
[6] प्रश्नोपनिषत् 1/15
[7] प्रश्नोपनिषत् 3/12
[8] प्रश्नोपनिषत् 4/10
[9] प्रश्नोपनिषत् 5/5
[10] प्रश्नोपनिषत् 5/7
[11] मुण्डकोपनिषत् 1/1/5
[12] मुण्डकोपनिषत्- 1/1/6
[13] मुण्डकोपनिषत् 1/1/8
[14] मुण्डकोपनिषत् 1/2/6
[15] मुण्डकोपनिषत् 1/1/13
[16] मुण्डकोपनिषत् 2/1/1
[17] मुण्डकोपनिषत् 2/1/2
[18] मुण्डकोपनिषत् 2/1/10
[19] मुण्डकोपनिषत् 2/2/1
[20] मुण्डकोपनिषत् 2/2/2
[21] मुण्डकोपनिषद् 2/2/2
[22] मुण्डकोपनिषत्- 2/2/3
[23] मुण्डकोपनिषद् 2/2/5
[24] मुण्डकोपनिपद् 2/2/7

---

निष्कलं तच्छुभ्रं ज्योतिषां ज्योतिः' [2]'ब्रह्मैवेदं विश्वमिदं वरिष्ठम्' [3]'पुरूषं ब्रह्मयोनिम्' [4]'यत्सत्यस्य परमं निधानम्' [5]बृहच्चतद्दिव्यमचिन्त्यरूपं सूक्ष्माच्च तन्सूक्ष्मतरं विभाति, [6]'तस्यैष आत्मा विशते ब्रह्मधाम' [7]'स वेदैतत्परमं ब्रह्मधाम' [8]'ते ब्रह्म लोकेषु परान्तकाले' [9]'परमं ब्रह्म वेद ब्रह्मैव भवति' [10]'सर्वमेतद् ब्रह्म, अयमात्मा ब्रह्म' [11]'आकाशशरीरं ब्रह्म' 'ब्रह्मविदाप्नोति परं' 'सत्यं ज्ञानमनतं ब्रह्म' 'यो वेद निहितं गुहायां परमे व्योमन्' [12] 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता' [13]'आनन्दं ब्रह्मणो विद्वान् न विभेति कुतश्चन्' [14]'विज्ञानं ब्रह्म' [15]'अस्ति ब्रह्मेति चेद् वेद् सन्तमेनं ततो विदुः' [16]'स एतमेव पुरूषं ब्रह्म ततमपश्यत' [17] 'अमुष्मिन् स्वर्गे लोके सर्वान्कामानाप्त्वाऽमृतः समभवत् [18] 'ब्रह्मसंस्थोऽमृतत्वमेति' [19]'त्रिपादस्याऽमृतं दिवि' [20]'अन्तर्हृदये आकाशः' 'अथ यदतः परो दिवो ज्योतिर्दीप्यते' [21]'तदिदमन्तः पुरूषे ज्योतिः' [22]'सर्वं खल्विदं ब्रह्म' [23]'सता सौम्य तदा सम्पन्नो भवति' 'सन्मूलाः सौम्य सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः [24]'एष देवपथो ब्रह्मपथः' [25]'सति सम्पद्य' [26] 'सत आगत्य' [1] 'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं

---

[1] मुण्डकोपनिषत् 2/2/9
[2] मुण्डकोपनिषत् 2/2/11
[3] मुण्डकोपनिषद् 3/1/3
[4] मुण्डकोपनिषत् 3/1/6
[5] मुण्डकोपनिषत् 3/2/1
[6] मुण्डकोपनिषत् 3/2/4
[7] मुण्डकोपनिषत् 3/2/1
[8] मुण्डकोपनिषत् 3/2/6
[9] मुण्डकोपनिषत् 3/2/9
[10] माण्डूक्योपनिषत् 1/2
[11] तैत्तिरीयोपनिषत् - अ. 6
[12] तैत्तिरीयोपनिषत् आ.1
[13] तैत्तिरीयोपनिषत् अ 4
[14] तैत्तिरीयोपनिषत् आ.अ.5
[15] तैत्तिरीयोपनिषत् आ. अ-6
[16] ऐतरेयोपनिषत् 1/3
[17] ऐतरेयोपनिषत् 2/4
[18] छोदोग्योपनिषत् 2/23/1
[19] छान्दोग्योपनिषत् 3/12/6
[20] छान्दोग्योपनिषत् 3/12/9
[21] छान्दोग्योपनिषत् 3/13/7
[22] छान्दोग्योपनिषत् 3/14/1
[23] छान्दोग्योपनिषत् 6/8/4
[24] छान्दोग्योपनिषत् 4/15/6
[25] छान्दोग्योपनिषत् 6/9/1
[26] छान्दोग्योपनिषत् 6/10/2

---

वेश्मदहरोऽस्मिन्नन्तराकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यम् [2]'ब्रह्मपुरे सर्व समाहितम्' (4) 'एतत्सत्यं ब्रह्मपुरम्' (5) एतद् ब्रह्मलोकं न विदन्त्यनृतेन हि प्रत्यूढा: [3]'एतदमृतमभयमेतत् ब्रह्मेति, तस्य ह वा एतस्य ब्रह्मणो नाम सत्यमिति . [4]'तद्यत्सत्तदमृतम्' [5]'अपहत पाप्मा ह्येष ब्रह्मलोका:, सकृद् विभातो ह्येष ब्रह्मलोका' [6]'ततो मूर्धानमभिनि: सृतैकातयोर्ध्वमायत्नमृतत्वमेति' [7]'परं ज्योतिरूपसम्पद्यस्वेन रूपेणाऽभिनिष्पद्यते [8]'मनोऽस्य दैवं चक्षु:, मनसा पश्यन् रमते ब्रह्मलोके' [9]'ब्रह्मैतद्धि सर्वाणि रूपाणि बिभर्ति' [10]'यावदायुषं ब्रह्मलोकमभिसम्पद्यते' [11]तदब्रह्माऽवैत् , [12]द्वे वाव ब्रह्मणो रूपे मूर्तं चैवाऽमूर्त च मर्त्यं चाऽमृतं च स्थितं च यच्च सच्च त्यच्च [13]'अमृतमिदं ब्रह्मेद सर्वम्' [14]'तदेतद्ब्रह्माऽपूर्वमनपरम् अनन्तरमबाह्यम्' [15]'यदेव साक्षादपरोक्षाद् ब्रह्म' [16]'सर्वे लोका ओताश्च प्रोताश्च ब्रह्मलोकेषु तदक्षरम् . [17] अस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोऽवारवनाकाशमसगमरसमगन्धमचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्राणममुखममात्रमनन्तरबाह्यम' [18] 'एतस्याऽक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ द्यावापृथिव्यौ निमेषा मुहूर्ता अहोरात्राणि अर्धमासा. मासा ऋतव सम्वत्सरा. विधृतास् तिष्ठन्ति' 'एतदक्षरमविदित्वा गार्गि अस्माल्लोकात् प्रैति. स कृपण., विदित्वा प्रैति स ब्राह्मण:. एतदक्षरं, गार्गि अदृष्टं द्रष्टृ अश्रुतं श्रोतम् अमतं मन्त्रविज्ञातं विज्ञातृ' 'एतस्मिन्नक्षरे गार्गि आकाश ओतश्च प्रोतश्च' [19]सर्वोऽस्मीति मन्यते सोऽस्य परमो लोक [20]सलिल एको द्रष्टाऽद्वैतो भवत्येष ब्रह्मलोक:, एषास्य परमा गति:, परमा सम्पत्, परमो लोक: परमानन्द: एतस्य वाऽऽनन्दस्याऽन्यानि भूतानि मात्रामुपजीवन्ति , [21]'एष. परम

---

[1] छान्दोग्योपनिषत् 8/1/1
[2] छान्दोग्योपनिषत् 8/3/2
[3] छान्दोग्योपनिषत् 8/3/4
[4] छान्दोग्योपनिषत् 8/3/5
[5] छान्दोग्योपनिषत् 8/4/2
[6] छान्दोग्योपनिषत् 8/6/6
[7] छान्दोग्योपनिषत् 8/12/3
[8] छान्दोग्योपनिषत् 8/14/1
[9] बृहदारण्यकोपनिषत् 1/6/2
[10] छान्दोग्योपनिषत् 8/15/1
[11] बृहदारण्यकोपनिषत् 1/4/10
[12] बृहदारण्यकोपनिषत् 2/3/1
[13] बृहदारण्यकोपनिषत् 2/5/2
[14] बृहदारण्यकोपनिषत् 2/5/19
[15] बृहदारण्यकोपनिषत् 3/4/2
[16] बृहदारण्यकोपनिषत- 3/6/1
[17] बृहदारण्यकोपनिषत् 3/8/8
[18] बृहदारण्यकोपनिषत् 3/8/11
[19] बृहदारण्यकोपनिषत् 4/3/20
[20] बृहदारण्यकोपनिषत् 4/3/32
[21] बृहदारण्यकोपनिषत् 4/3/32

आनन्द एष ब्रह्मलोक:' [1]'तेन धीरा अपियन्ति ब्रह्मविद: स्वर्ग लोकमित उर्ध्वं विमुक्ता:' [2]'विपापो विरजो विचिकित्सो ब्राह्मणो भवत्येष ब्रह्मलोक:, [3]'तान् वैद्युतान् पूरूषो मानस एत्य ब्रह्म लोकान् गमयति तेषु ब्रह्मलोकेषु परा: परवतो वसन्ति तेषां न पुनरावृत्ति: ।

एता अक्षरब्रह्मलोकपरायणा: श्रुतयो भिन्नभिन्नगुणैश्वर्यस्थितिसामर्थ्य बललाभदिव्यत्वाद्यनेक विशेषण-विशिष्टमक्षरब्रह्म बोधयन्ति। (भाष्यात)

'श्री स्वामिनारायणवेदान्तसारे' सर्वतन्त्र स्वतन्त्र श्रीकृष्णवल्लभाचार्यमहोदया: षष्ठप्रकरणे लिखन्ति यत्-

**प. श्रीकृष्णवल्लभाचार्यमहोदयानमक्षरविषयकं मतम् –**

मुक्तादीनामाधारत्वे सति परब्रह्मव्याप्यचेतनत्वम्, परब्रह्म भिन्नत्वे सति सर्वाऽऽधारैकचेतनत्वम्, साकारनिराकारोभयस्वरूपवच्चेतनत्वम्, केवलात्वयित्वे सति शरीरत्वम्, जीवेश्वरमुक्तपरब्रह्मभिन्न चेतनत्वम्, भोग्यभोग्योपकरणविशिष्टत्वे सति परमेश्वरधामत्वं वेत्यादीनि तल्लक्षणान्यवसेयानि। तच्च ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावं परब्रह्मणस्तेजो विशिष्टमक्षरधामसंज्ञकं मुक्तानामाधारभूतं चेति। तत्र श्रुतिस्मृतय: प्रमाणम्- [4]'ह्येतदेवाऽक्षरंब्रह्म ह्येतदेवाऽक्षरं परम्। ह्येतदेवाऽक्षरं ज्ञात्वा ब्रह्मलोके महीयते; "सत्यं ज्ञानमनन्तं च पूर्णं चाखण्डमक्षरम्। धाम यद्वासुदेवस्य मूर्तं चामूर्तमुच्यते।" "सत्यं ज्ञानमनन्तं यदब्रह्मज्योति: सनातनम्। यद्विपश्यन्ति मुनयो गुणाऽपाये समाहिता"। [5]"शुद्ध नित्यं चाविकारि मायादीनां प्रकाशकम्। तद्ब्रह्मेति विजानीहि सर्वाधारतया मतम्" "एतत्सत्यं ब्रह्मपुरम्' [6]'अपहतपाप्माह्येष ब्रह्मलोक:" "यस्मिन् लोका निहिता लोकिनश्च तदे तदक्षरं ब्रह्म"।। "लक्ष्यन्तेऽर्गततान्येऽपि, कोटिशश्चाण्डराशय:। तदाहुरक्षरं ब्रह्मेति" (भागवतम्) इत्यादि।

ननु परब्रह्मणस्तेजोरूपमेवाक्षरधाम, न तदतिरिक्तमिति चेत् न। परमात्मन स्वतेजोभिन्नत्वेन तत्र तस्य दृश्यदृष्टिभाव-प्रवेश्य प्रवेष्टृभावान्तर्याम्यान्तर्यामिभावव्याप्यव्यापकभावाऽनुपपत्ते:। सूर्यस्य यथा स्वतेजसा जगद्व्यापकत्वं न तु स्वतेजसि स्वस्य व्यापकता तथा सति किञ्चिद्धर्मेण स्वभिन्ने स्वव्यापकत्वनियमानुरोधेन स्वधर्मभूते तेजसि स्वव्यापकत्वं अन्येन धर्मेण स्वीकार्य पुनस्तत्र धर्मान्तरेण पुनस्तत्राऽपरधर्मेणेत्यनवस्थापात:। तथा परब्रह्मण: स्वतेजसि व्यापकत्वं केनचिद्धर्मेण, तत्र चान्यधर्मेण तत्राऽपि तथेति अनवस्थाभिया स्वाऽभिन्नेन तेजसा स्वभिन्ने

---

[1] बृहदारण्यकोपनिषत् 4/8/8
[2] बृहदारण्यकोपनिषत् 4/4/23
[3] बृहदारण्यकोपनिषत् 6/2/15
[4] कठवल्ली अ.1 वल्ली 2-16
[5] सत्संगिजीवनम्
[6] छान्दोग्योपनिषत्

ब्रह्मण्यक्षरे व्यापकत्वं सुवचम्। न च तथा सति दृश्य दृष्ट्रिभावादिष्वनवस्थापातः अनस्तदतिरिक्तं तत्त्वमक्षरं ब्रह्मेति।

किञ्च लोहप्रकरणस्थपञ्चदशे वचनामृते नित्यानन्द स्वामिनां प्रश्नोत्तरे श्रीहरिणोक्तम्- "जीवः पुरूषोऽक्षरं पुरूषोत्तमश्चेत्येतेषां सर्वेषां तेजस्तु प्रकाशत्वेन रूपेण सजातीयं विद्यते, अनस्तद्भेदं निरूपयितुं कश्चिदपि समर्थो न. भवति, किन्तु भेदस्त्वत्यन्त वर्तते तथापि तमवगन्तुं न भवति कश्चिदपि समर्थः, यस्योपरि स भगवान् कृपां करोति तथा प्रकाशमय दिव्यदेहः सम्पद्यते, तदनु स एवं जानाति यत्- अयमहमस्मि, अय पुरूषोऽस्ति, इदमक्षरमस्ति, अथ तेभ्यः सर्वेभ्यो विलक्षणोऽयं पुरूषोत्तमोऽस्तीति, एवं रीत्या तान् सर्वान् पृथक्तयावलोकयति, अथ च तेषां प्रकाशानपि विलक्षणतया पृथक्तया च पश्यतीति, अतः परमेश्वरस्य तेजसोऽतिरिक्तमक्षरं ब्रह्म तेजोमयिति। जीवलोकेश्वरमायामुक्तब्रह्मलोकेषु सर्वत्राऽस्याक्षरब्रह्मणस्तेजो विभूतयः शक्तय ऐश्वर्याणि वेति, "यस्य भासा सर्वमिदं विभाति" इति श्रुतेः।। विराडादीश्वराणां सूर्यचन्द्रादीनां च प्रकाशोऽक्षरब्रह्मण एव, तेषां स्वतन्त्र प्रकाशकत्वाऽभावात्, यस्य मायावरण यत्र विलयं गतं तस्य तत्रैवाऽक्षरधाम विद्यते न तु दूरमिति, तादृशेऽक्षरब्रह्मणि च परब्रह्मण एवैश्वर्यविभूतिशक्तिगुणस्वभावविज्ञानसुखस्वरूपादीनि समवस्थितानीति। परब्रह्मसत्ताऽतिरिक्त स्वतन्त्रसत्ताकान्यैश्वर्यादीनि परमेश्वराऽतिरिक्ते कुत्रापि न सन्तीति सिद्धान्तादिति।

साम्प्रदायिकैकदेशिनः- जीवेश्वरमुक्तिकोटिवत् ब्रह्मकोटिमक्षरकोटिं तन्मुक्तमण्डलानि चाऽभ्युपगच्छन्ति, निरञ्जनब्रह्मशबलब्रह्मकेवलब्रह्माऽक्षरब्रह्मेत्यादीन्यनेकान्यभिमन्यन्ते। तत्र प्रकारान्तरेणाऽक्षरब्रह्मणः स्थूलसूक्ष्मकारणमहाकारणेति शरीरचतुष्ट्यम्। तत्र स्थूलशरीरात्मक 'निरञ्जनब्रह्म' तस्याऽपराऽभिधानं 'अनादिश्रीकृष्णः' 'वासुदेव' इति च। तस्य धाम नित्यगोलोकः। तत्र सच्चिदानन्दात्मकदिव्यानन्तशक्त्यैश्वर्यपार्षदमुक्तमण्डलादिभि ससेवितोऽनादि श्रीकृष्णपरमात्मा विराजते तदुपासकानां तत्- षष्ठं मुक्तस्थानमिति सूक्ष्मशरीरात्मकः 'शबलब्रह्मपुरूषः' तस्य धाम-शबल-ब्रह्मलोकः, तत्र पञ्चशक्तिसहकृतपञ्चशिवपर्यकस्थ. शबलब्रह्मपुरूषोऽनन्तैर्दिव्यसच्चिदानन्दस्वरूपैर्मुक्तैः शक्त्यैश्वर्यादिभिश्च संसेवितो विराजते, तदुपासकानां तत् सप्तमं मुक्तिस्थानमिति। कारणशरीरात्मकः 'केवलब्रह्मपुरूषः' तस्य-धाम-केवलब्रह्मलोकः, तत्र ब्रह्मद्वीपे वेदिकायां सिंहासने आनन्दयोगमायादिशक्तिभिरनन्तदिव्यैश्वर्यमुक्तादिभिः सेवितः केवलब्रह्मपुरूषो विराजते, तदुपासकानां तदष्टमं मुक्तिस्थानमिति। महाकारण-शरीरं चाऽक्षरब्रह्म, तस्याऽक्षरधामलोकः, तत्र ब्रह्मप्रासादे दिव्यमण्डपे मुक्तमण्डलानि स्थितानि, तन्मध्ये ब्रह्मच्छत्रम्, तदधो दिव्यं सिंहासनम्, तत्र मूलाक्षरब्रह्म विराजते, तदुपासकानां तन्मुक्तिस्थानं नवममिति। अथ निराकार व्यापकरूपेणाऽवस्थितं 'परमाऽक्षर' धाम परब्रह्म श्री स्वामिनारायणपरमात्मनस्तद्धामेति। तत्र तत्र धाम्नि अनन्ता मुक्तादिकोट्यः सन्तीति वर्णयन्ति।

एवमेव भगवत्शरीरभूतमक्षरब्रह्मणः निरूपणं कृतम्।

## ।।अथ परब्रह्मस्वरूपनिरूपणम्।।

हृदये जीववज्जीवे योऽन्तर्यामितया स्थितः।
ज्ञेयः स्वतन्त्र ईशोऽसौ सर्वकर्मफलप्रदः।।

हृदये- हृत्पद्मे, जीववत्- यथा जीवस्थितः तथा, यो जीवे-जीवात्मनि, अन्तर्यामितया-अन्तः स्थित्वा यमयति- नियमयति इति तथोक्तस्य भावस्तत्ता तया। नियन्तृरूपेण स्थितः। एतदुक्तं भवति- यथा शरीरं जीवाधिष्ठितमेव स्वकार्यसमर्थम्, अन्यथा तु काष्ठप्रायमसत्, तथाऽयं जीवोऽपीश्वर सत्तयैव चेतयते, अन्यथा त्वसत्कल्प एव भवेत्, अत एवान्तः प्रविश्य नियन्तृत्वमस्यैवासाधारणमिति। तथा च श्रुतिः- 'य आत्मनि तिष्ठन् नात्मानोऽन्तरो यमयति' [1]'यो विज्ञाने तिष्ठन् विज्ञानमन्तरो यमयति

ननु कोऽयमन्तः प्रवेशो जीवे निरवयवे, तस्मिन्नन्तर्बहिर्विभागाभावात्। सत्यम्। तथापि व्याप्तिमात्रे तात्पर्यात्तदुपपत्तिः। मूर्तान्तरस्थितेर्मूर्तान्तरगतिप्रतिरोधकतेव

---

[1] श प. 14/5/30

नहिजीवस्थितेरन्तर्यामिगतिप्रतिरोधकता, स हि सर्वत: सूक्ष्मतम: [1]'अणोरणीयान् महतो महीयान्' इति श्रुते:। 'आत्मानमन्तरो यमयतीत्यत्रान्तरशब्दस्योक्तार्थ एव तात्पर्यम्।

हृदये जीववदिति द्रष्टांतग्रहणात्तयोरिवान्तरमनयोर्व्यज्यते। व्याप्यान्नियाम्याद्देहाद् व्यापको नियामको जीव इव व्याप्यान्नियाम्याज्जीवाद् व्यापको नियामक. सर्वेश्वरोऽन्य इत्येतत्। तथा च श्रुतय· [2]'भोक्ता भोग्यं प्ररितारं च मत्वा' 'समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमान:, [3]'जुष्टं यदा पश्यत्यन्यमीशमस्य महीमानमिति वीतशोक' [4]'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्व जाते। तयोरन्य पिप्पल स्वादवत्यनश्ननन्योऽभिचाकशीति' [5]'ज्ञाज्ञौ द्वावजावीशनीशौ' [6]'अस्मान् मायी सृजते विश्वमेतत् तस्मिश्चान्यो मायया सन्निरूद्ध:' इत्याद्या। [7]'उत्तम पुरूषस्त्वन्य परमात्येत्युदाहृत:। यो लोकत्रयमाविश्य विभर्त्यव्यय ईश्वर.' इत्याद्या.।

**आत्मैकत्वविज्ञानसमीक्षा –**

ननु वस्तुनो जीवान्नेश्वरो भिन्न· प्रमाणाभावात्, न हि तत्र प्रत्यक्षं, ईश्वरे तदसम्भवात्, नाप्यनुमानं प्रतिनियतलिंगासिद्धे:, उपलभ्यमानस्य चाज्ञत्वादेर्मायिकत्वेनाविरोधात्, उक्त श्रुतिनां त्वभेदतात्पर्यकश्रुतिस्मृतिशतोपमर्देन तत्रातात्पर्यात्। तथा च श्रुतय.- [8]'अथ योऽन्यां देवतामुपास्ते अन्योऽसावन्योऽहस्मि इति न स वेद योऽसावसौ पुरूष. सोऽहमस्मि. त्व वा अहमस्मि भगवो देवते अहं वै त्वमसि भगवो देवते' [9]'तत्वमसि श्वेतकेतो' [10]'अथातोऽहंकारादेश: अहमेवाद्यस्तादहमुपरिष्टादहं पश्चादहं पुरस्तादह दक्षिणतोऽहमुत्तरतोऽहमेवेदं सर्वम्' [11]'यत्परं ब्रह्मविश्वात्मा विश्वस्यायतनं महत्। सूक्ष्मात्सूक्ष्मतरं नित्यं तत्वमेव त्वमेव तत्' [12]"नेह नानास्ति किञ्चन, मृत्यो. स मृत्युमाप्नोति य इह नानेव पश्यति' [13]'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केनकं पश्येत्केन कं विजानीयात्' 'ब्रह्मवेदब्रह्मैव भवति'

---

[1] कठोपनिषत् · 2/20
[2] श्वेताश्वतरोपनिषत्- 1/12
[3] मुण्डकोपनिषत् 3/1/2
[4] मुण्डकोपनिषत् 3/1/1
[5] श्वेताश्वतरोपनिषत् 1/9
[6] श्वेताश्वतरोपनिषत् 4/9
[7] श्रीमद्भगवद्गीता- 15/17
[8] बृहदारण्यकोपनिषत् 1/4/10
[9] छान्दोग्योपनिषत् 6/8/7
[10] छान्दोग्योपनिषत् 7/25/1
[11] कैवल्योपनिषत् 16
[12] बृहदारण्यकोपनिषत् 4/4/19
[13] बृहदारण्यकोपनिषत् 2/4/14

---

[1]'यस्तुसर्वाणिभूतान्यात्मन्येवानुपश्यति। सर्वभूतेषु चात्मानं ततो न विजु गुप्सते' 'यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यत.' इत्याद्या.। स्मृतयश्च [2]'क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत'। [3]'ममैवांशो जीवलोके जीवभूत सनातनः' [4]'समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्। विनश्यत्स्व विनश्यन्त य पश्यति स पश्यति स पश्यति' [5]'समं पश्यन् हि सर्वत्र समवस्थितमीश्वरम्' [6]'योमां पश्यति सर्वत्र सर्वं च मयि पश्यति। तस्याहं न प्रणश्यामि स च मे न प्रणश्यति' [7]'अहमात्मा गुडाकेश सर्वभूताशय स्थितः' [8]'यदा भूतपृथग्भावमेकस्थमनुपश्यति। तत एव च विस्तारं ब्रह्म सम्पद्यते तदा' [9]'यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रवि.। क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत' 'सोऽहं स च त्वं स च सर्व मेतदात्मस्वरूपं त्यजभेदमोहम्। इतीरितस्तेन स राजवर्यस्तत्याज भेदं परमार्थद्रष्टि·'।। 'विभेदजनके ज्ञाने नाशमात्यान्तिकं गते। आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति।।' इत्याद्याः।

अत्र ब्रूमः- यश्चैषामुद्घोषः। निरस्तसमस्तभेदं ब्रह्मेति। तमिममुपशमयाम.। प्रथमं भेदसामान्यमसहमानेन वक्तव्यं ब्रह्मणः स्वरूपम्। ननूक्तं श्रुत्यैव- सत्यं ज्ञानमनन्तं ब्रह्मेति। सत्यमुक्तम्। धर्मभेदमप्यसहमानस्य तु विप्रतीपं तत्। धर्मभेदनिबन्धना हि तस्याः प्रवृत्ति.। हन्त। समानाधिकरण शब्दानां लेशतोऽपि गतिं न जानाति भवान्। अखण्डार्थविबोधकता हि तेषां स्वभावः। हन्तापूर्वोऽयं वाक्यार्थविमर्शः, केयमखण्डार्थता वक्तव्यं वाक्यस्वारस्य कोविदेन। किमच्छेद्यार्थता? किं वा निरवयवार्थता? नीलमुत्पलमित्यादौ प्रतीयमानो ह्युत्पलादिर्नाच्छेद्यो न वा निरवयवः। न वा निर्विशेषणार्थपरता, निर्विशेषणत्वस्यापि विशेषणरूपत्वेन तत्प्रतीतावपि भवदभिमताखण्डार्थत्वभंगात्, वस्तुतो यन्निर्विशेषणं तत्परतायां तु, सगुण ब्रह्मवाक्यानामपितथात्वापातः। अभिमतासिद्धिश्च। विशेष्यमात्र परत्वं चेत्- तद्धि विशेषणाविषयकविशेष्यविषयकबोधपरत्वम्। एको बोधो विशेषणाविषयको विशेष्य विषयकश्चेति तु व्याहतम्। अथ नेह वाक्यार्थापेक्षया विशेषणविशेष्यव्यपदेश., किन्तु पदार्थोपस्थित्यपेक्षया पदत्या उपस्थाप्यमाने विशिष्टे योऽयं विशेषणांशं तं विना विशेष्यांशमात्रस्य बोधक तेत्येतत्। तर्हि विशिष्ट एकांशस्य परित्यागेनैकांशस्य बोधनादेकः खण्डो गृहित इति खण्डार्थपरतेति तु वक्तव्यम्। कोऽयमखण्डार्थपरतेत्युद्घोषः। किञ्च- काकेभ्यो दधि रक्ष्यतामित्यादौ काकपदोपस्थाप्ये काकत्वविशिष्टे विशेषणं काकत्वं विहाय व्यक्तिमात्रस्य प्रकारान्तरेण बोधनात् तत्राप्यखण्डार्थत्वं स्यात्। हन्त। भोः अर्थविज्ञानविधुरस्य तव

---

[1] ईशावास्योपनिषत् 6, 7
[2] भगवद्गीता 13/2
[3] भ गी 15/7
[4] भ गी 13/29
[5] भ गी 13/28
[6] भ. गी. 6/30
[7] भ गी. 10/20
[8] भ गी 13/30
[9] भ. गी. 13/33

---

पण्डितवचनमप्युद्घोषायते। विशेष्यमात्रपरता हि वैशिष्टयानवगाहिबोधपरता, वैशिष्ट्यमाने हि विशेष्यं विशेषणमिति खण्डभेदः, तदनवगाहित्वादखण्डार्थता। 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादि समानाधिकरणपदानामापाततः प्रतीयमाने विशेष्य-विशेषणसंसर्गे तात्पर्याभावादखण्डार्थतया निर्विशेषवस्तु प्रतिपत्तिरिति प्रत्यस्तमितभेदं ब्रह्मरूपमिति युक्तमुक्तम्।

ननु- काऽनुपपत्तिः प्रतीयमानार्थे यथा तात्पर्यं स्वरूपमात्रे, इयमेवानुपपत्ति, यदिह समानविभक्त्यवगम्यमर्थैक्यं नोपपद्यते, कुतो नोपपद्यते? विशेषण भेदेन विशेष्यभेदात्। ननु- विशेषणं विशेष्यं भिनत्ति इति कोऽयं नियमः। विशेषणस्वाभाव्यात्। विशिष्यते- व्यावर्त्त्यतेऽनेनेति हि विशेषणम्। तत् सत्यत्वं स्वेतरविशेषणविशेषितात्म्वविशेष्यं भिनत्ति, ज्ञानत्वाद्यपि तथेति। तत्तद्विशेषितयोरैक्यमनुपपन्नम्, तत्स्वरूपमात्रपरतैवाश्रयणीया। 'नीलमुत्पलं' 'श्यामो युवा लोहिताक्षः पीनो देवदत्त' इत्यादिषु तु विशेषणभेदतः प्राप्तोऽपि विशेष्यभेदः प्रत्यक्षतो बाध्यते। तत्तत्र वैशिष्ट्यं प्रतीयते नाम। प्रत्यक्षागम्ये तु विशेषणानां स्वतः प्राप्तं भेदकत्व न केनापि बाध्यत इति नात्र वैशिष्ट्यप्रतीत्यवकाश इति।

हन्तेयमन्यादृश्येवाशामोदकसम्पादन चातुरी। यदि नाम विशेषणानां स्वत प्राप्तमविशेष्यविभेदकत्वं प्रत्यक्षेण बाध्यते तर्हि प्रत्यक्षेणेवेहपि धर्मिवाचक पदैक्यात्समानविभक्तिनिर्देशाच्च विशेष्यावगमात्कुतो न तद्बाध्येत। ननु धर्मिवाचक पदैक्यस्य समानविभक्तिनिर्देशस्य च विशेष्यैक्यावबोधकत्वं नियतम्, खण्डोमुण्डः पूर्णशृंगो गौरित्यादौ व्यभिचारादिति चेत्? विशेषणानां भेदकत्वमेव नियतं स्वतः प्राप्तमपि तत् क्वचित्प्रत्यक्षेण बाध्यत इति वत्, धर्मिवाचकपदैक्यसमानविभक्तिनिर्देशयोर्विशिष्यैक्यावबोधकत्वमेव नियत स्वत प्राप्तमपि तत्क्वचित्प्रत्यक्षेण बाध्यत इति किं नेष्येत। परोक्षविषयेऽपि तादृशवाक्ये न प्रतीयते विशेष्यैक्यमिति चेत्- परोक्षविषयेऽपि देवदत्तः श्यामो युवेत्यादौ विशेषैक्यं प्रतीयत इति समानः पर्यनुयोग.। ननु- विशेषणशब्द स्वारस्यत एवावगम्यमानं विशेष्यभेदकत्वं कथमिव दूरीक्रियते। न वयं दूरीकूर्मो भेदकत्वं विशेषण शब्दस्वरससिद्धम्। परं विशेषण विशेष्य कस्मात् भिनत्ति इति तु विचार्यम्। भेदकधर्मस्य ह्ययमेव स्वभाव· स्वाश्रयस्य स्वानाश्रयतो व्यावर्तनम्, न तु स्वेतराश्रयमात्रतः। न हि गन्धः स्वाश्रयं स्वाश्रयमात्रतो विभिनत्ति। तदिदं सिद्धम्- येषां विशेषणानां वैयधिकरण्यं दृष्टं तेषां विशेष्यभेदकत्वं, येषां तु न तेषा न तदिति। यदिदमेषां निरूपणं विशेषणसामान्यस्य व्यपेतमर्यादं भेदकत्वमभ्युपगम्य- इदं हि प्रत्यक्षविरूद्धमित्याक्षेये प्रत्यक्षेण तु बाध्यते भेदकत्वं, स्वभावस्तु स एव, सर्वथा परोक्ष एवायं स्वभावः प्रकाशत इति। तदिदं प्रतारणकौशलमन्यद् वेति परीक्षकै पर्यालोचनीयं नाम।

किञ्च- समानविभक्तिनिर्देशस्वारस्यसिद्धं विशेषैक्यमनुपपद्यमानमभिमन्यविशेषणं त्यजन्नयं प्रष्टव्यः। प्रकृतिस्वारस्य सिद्धविशेषणान्वयानुपपत्या विशेष्यैक्यमेव किं न त्याज्यम्। समानविभक्तिनिर्देशस्वारस्यं हीयेतेति चेत्। प्रकृतिस्वारस्यमधुना न किं हीयते। प्रत्ययस्वारस्यं चेत्संरक्ष्यं प्रकृति स्वारस्यं किं हेयम्। प्रकृतिः ·किं प्रत्ययतो दुर्बला। किञ्च- व्यधिकरणवाक्येष्वप्यनेककारकान्वयरूपविशेषणभेदात् विशेष्यभेदापत्याऽर्थैक्यं व्याहन्येतेति समानाधिककरणवाक्य इव धर्मिस्वरूपमात्रबोधकत्वस्यावश्याभ्युपगन्तव्यतयाऽखण्डार्थता

वाक्यसामान्य एव स्यात्। न च तत्रार्थैक्ये न तात्पर्यम् एक वाक्यता भंगप्रसंगात्, 'अर्थैकत्वादेकं वाक्यं साकांक्ष चेद् विभागे स्यात्' इति हि सूत्रम्।

किञ्चाविद्यया चेद्भ्रम: कस्याविद्यासम्बन्ध:। जीवस्येति चेत्। जीवभावस्याविद्याकल्पितत्वेन जीवभावसम्पादकाविद्यासम्बन्धस्तत. प्रागेवापेक्षते। ब्रह्मण्येव तत्सम्बन्ध इति चेत्! तत्स्वरूपस्य स्वप्रकाशज्ञान रूपत्वेनाऽविद्याविरोधित्वान्न तत्र तद्योगो घटेत! सा हि ज्ञानबाध्या भवदभिमता। ननु- सत्यं ज्ञानबाध्याऽभिमता, तथापि न ब्रह्मस्वरूपभूतज्ञानबाध्येति चेत्को विशेषो निवर्तक ज्ञाने। नहि निर्विशेषे स्वयं प्रकाशे ज्ञान स्वरूपे ब्रह्मणि ज्ञानान्तरगम्यो ज्ञातव्य विशेषोऽवशिष्यते, येन निवर्तकज्ञानान्तरापेक्षास्यात्। स्वरूपज्ञानस्याविरोधित्वं च स्यात्। अनुभूतिस्वरूपस्य ब्रह्मणोऽनुभूत्यन्तरानुभाव्यत्वे जडत्वापत्तेरननुभाव्यत्वमेव भवदभिमतम्। प्रपञ्चमिथ्यात्वज्ञानमेवाविद्याविरोधीति ब्रह्मस्वरूपेऽविद्या सम्बन्धे न कश्चिद्विरोध:। मैवम्। प्रपञ्चमिथ्यात्वज्ञानेन प्रपञ्चसत्यत्वज्ञान निवर्त्येत न तु ब्रह्मस्वरूपाज्ञानम्, विषयभेदात्। तदविद्याविरोधित्वं ब्रह्मस्वरूपज्ञानस्यैव वक्तव्यम्। तथा चोक्तो. विरोधोऽपरिहार्य:। ननु- ब्रह्मस्वरूपाज्ञानं हि स्वानुभव सिद्धमिति स्वयंप्रकाशे ब्रह्मणि तदज्ञानरूपाविद्या सम्बन्धो दुर्घटएव। न चाद्वितीयत्वमनुभवान्तरयोग्यो धर्म: कश्चन्, ब्रह्मणि तदनभ्युपगमात्। अविद्या सेयमिष्टा व: पदं क्वापि न विन्दति। निराश्रय: क्व गच्छेत् सा युष्मानेवोपसर्पति।

किञ्चास्या अविद्याया निवृत्ति: केन? ब्रह्मात्मैकत्वविज्ञानेनेतिचेत्। किमिदं सत्यम्, उत मिथ्या? सत्यत्वे सद्वितीयत्वं मित्यात्वेनिर्वतकमन्यदपेक्ष्यते तत्तु मृग्यम्। यदि किञ्चित्कल्पेत तस्यापि मिथ्यात्वेन निर्वतकान्तरापेक्षैवैत्यनवस्था। विना निवर्तकं स्वयमेव नश्यतीति चेत्! तन्नाशस्यापि काल्पनिकत्वेन तत्कल्पकाऽविद्याऽवतिष्ठत्येव। किञ्चाऽविद्यानिवर्तकतया भवदभिमतस्य ब्रह्मव्यतिरिक्तंकृत्स्ननिषेधविषयज्ञानस्य ज्ञाता क:? ब्रह्मैव चेत! किमेतज्ज्ञातृत्वं स्वाभाविकमुतकल्पितम्? नाद्य: अपसिद्धान्तात्। नं द्वितीय: एतस्यैतत् कल्पकाविद्यायाश्चावस्थानप्रसंगात्। यत्तु ब्रह्मव्यतिरिक्तोऽध्यस्त एवास्य ज्ञाता यच्चेदं निवर्तकं ब्रह्मव्यतिरिक्तनिषेधविषयं ज्ञानं यश्चास्य ज्ञाता उभयोरपि ब्रह्मव्यतिरिक्तत्वेन निवर्त्यकोटिप्रवेशान्न निवर्तकान्तरापेक्षेति। तदिदं मूर्खजल्पितम्। रसालव्यतिरिक्तं सर्वमेव यज्ञदत्तेन छिन्नमित्यत्र छेत्तुश्छेदनक्रियायाश्च रसालव्यतिरिक्तत्वोपाधिसम्बन्धमात्रेण छेद्यकोटौक्रोडीकारो ह्युपहास्य:। आविद्यं शास्त्रविज्ञानमविद्याविनिवृत्तये ब्रूवतो भवतो नूनमविद्यैवावशिष्यते। एतेन तात्विक एव जीवेश्वरभेदो न काल्पनिक इति सिद्धम्।

ननु- भेदस्तात्विकश्चेत् प्रदर्शितश्रुतीनां का गति? अखिलमेवव्यलीकयतां युष्माकमेवागति:। परं ब्रह्म सर्वशरीरं सर्वप्रकारमभ्युपगच्छतां जगदखिलं तद्विभूतिमावक्षाणाना। विनोपमर्दं मिथ: श्रुतीस्तात्विकेऽर्थे नयतामस्माकम् काचिदप्यगति:-

'विश्वं यस्य विशेषणं तनुतया तत्त्वं स्वतन्त्रं तु तद्,
ब्रह्मैकं न तथाऽन्यदस्ति भुवने तत्स्थ हि जात्यादिवत्।

।।जयश्रीस्वामिनारायण।।
श्रीहरिवाक्यसुधासिन्धौ उपनिषदां प्रभावः

---

तत्तत् वाचिपदैः श्रुतिर्गदति तत्तत्प्रकारं ततो,
नानात्वं प्रतिषिध्यते यदपि तद्युक्तं तु धर्म्यैक्यत ।।
अन्तर्यामितया विविच्य वदता ब्रह्मस्वयं ब्राह्मणे,
वेदेनैव भिदाऽभिदावचनयोर्बाधं विना नीतयो ।
एकं बाधितमन्यत. कलयताऽपच्छेदनीत्याऽऽश्रितो,
मिथ्यावादमहान्धकूपपतने पन्थाः कुदृष्टिप्रिय.।।

अयं भावः- [1]'नेह नानास्ति किञ्चन' इति श्रुत्या न तावद्भेदसामान्यं निषिध्यते किन्तु विशेष्यनानात्वम्, इह जगति सर्वमेव चिदचिज्जातं परस्य ब्रह्मणः शरीरतया विशेषणम्। शरीरस्य लक्षणं प्रथमाध्याये निरूपितम्। शरीरता च [2]'यस्य पृथिवी शरीरम् इत्यादिनाऽन्तर्यामि ब्राह्मणे श्रूयते। शरीरस्य तु प्रकारतैकस्वभावस्य न कदापि स्वतन्त्रसत्ता। तथा च स्वेतरसमस्तचिदचित्प्रकारं ब्रह्मैकमेव प्रधानतत्वमिति प्रधानतत्त्वान्तराभावान्नानात्वनिषेधः सूपपन्नः। सत्यपि प्रकारप्रकारिभेदेगुणजात्याद्यनेकप्रकारे सत्येकस्मिन् द्रव्यविशेषे इहैकमेवास्ति न नाना इति व्यवहारवदिहापि प्रकारप्रकारिभेदे सत्यपि विशेष्यभेदाभावेन नानात्वनिषेधोपपत्तेः। यद्वा- नानाशब्दोविनार्थः [3]'विनञ्भ्यां नानाञौ न सह' इति सूत्रे विनार्थे व्युत्पादनात्। ब्रह्मणः पृथग्भूतं न किञ्चिदिति भाव.। सर्वस्य ब्रह्मणोऽपृथक्सिद्ध विशेषणत्वात्। 'मृत्योः स मृत्युं माप्नोति य इह नानेव पश्यति' इत्यादीन्यप्यनयैव दिशानेयानि। [4]'अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद' इत्यत्रापि परब्रह्मप्रकारतैकस्वभावे स्वस्मिन् स्वनिष्ठताबुद्धिरनुचितेति सा व्युदस्यते, न भेदसामान्यम्। इहान्यशब्दः स्वतन्त्रभेदपरः। अनयैव दिशा [5]'यत्र हि द्वैतमिव भवति' इत्यादावपि बोध्यम्। यत्र यदा द्वैतं भवति- द्वैतबुद्धिर्भवति- स्वतन्त्रबुद्धिर्भवति तदा स्वतन्त्र कश्चित्स्वतन्त्रेण केनचित् स्वतन्त्रं कञ्चित्पश्यन्तीति व्यवहारो भवेत्। यदा त्वात्मैवाभूत्- परमात्मपरतन्त्रतया तदात्मकतयाऽवगतं, तदा न तथा दृष्टिर्भवेदिति भावः। [6]'यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति। सर्वभूतेषु चात्मानं ततो न विजुगुप्सते' इति श्रुतिस्तु देवादिविषमाकारेणापाततः प्रतीयमानस्यापि वस्तुतो ज्ञानैकाकारस्य सर्वत्र समतया वर्तमानस्य स्वरूपे नाल्पमप्यन्तरं, तदेवमविषमतया जानत्स्वात्मनि सर्वाण्यात्मस्वरूपाणि सर्वत्रात्मस्वरूपे स्वात्मस्वरूपं च पश्यति। स्थालीपुलकन्यानेन साम्येन पश्यतीत्येतत्। एवं पश्यतो न क्वचिदपि जुगुप्सावकाश इत्याह। यद्वा यस्तु सर्वाणि परमात्मनि प्रतिष्ठितानि तदेकधार्याणि, परमात्मा चान्तरात्मतया सर्वभूतेषु वर्तत इति सर्वं ब्रह्मात्मकं वेत्ति स न तस्मिन् केनापि निमित्तेन गर्हां कुर्यादित्युच्यते। तन्नात्रभेदनिषेधावकाशः। [7]'यस्मिन् सर्वाणि भूतानि

---

[1] बृहदारण्कोपनिषत् 4/4/19
[2] बृहदारण्यकोपनिषत् अ 3 ब्रा 7-3
[3] पाणिनीयसूत्रम् 5/2/27
[4] बृहदारण्यकोपनिषत् - 1/4/10
[5] बृहदारण्यकोपनिषत् 2/4/14
[6] ईशावास्योपनिषत् 6
[7] ईशावास्योपनिषत् 7

आत्मैवाभूद्विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यतः' इत्यनेनापि ब्रह्मात्मकं सर्वमनुसन्दधानस्य न क्वापि मोहशोकावकाश इत्युच्यते। सर्वस्यैव चिद्वस्तुनोऽचिद्वस्तुनो वा परमात्मनो विलक्षणत्वेऽपि तं प्रत्यपृथक्सिद्धप्रकारतया तत्तत्वाचि शब्दैः सह तत्र श्रूयमाणं परमात्मवाचिनः शब्दस्य समानाधिकरण्यं संगच्छते। जात्याद्यपृथक्सिद्धधर्मवाचिनां गवादिशब्दानां धर्मिणि पर्यवसानं हि दृष्टम्। अत एव गौरयमित्यादयः समानाधिकरणाः प्रयोगाः। जात्यादिनामिव शरीरस्यापि प्रकारतयैव तु सत्ता। शरीरत्वं च तयोः परमात्मापेक्षया विश्रुतमन्तर्यामिब्राह्मणे। दण्डकुण्डलादेर्देवदत्ते कदाचित्प्रकारत्वेऽपि न तदपृथक्सिद्धप्रकारतेति तद्वाचि दण्डादिशब्दानां धर्मिणि पर्यवसानासम्भवात् धर्मिबोधने मत्वर्थप्रत्ययसापेक्षता। एतेन- जातिगुणाद्यर्थकानां शब्दानां द्रव्यपर्यव सायित्वम्वाभाव्येऽपि दण्डकुण्डलादि शब्दानामिव द्रव्यवाचिनां शरीराभिधायिनामपि कथं मत्वर्थप्रत्ययनिरपेक्षं धर्मिणि पर्यवसानमिति शंका परास्ता।

एतदुक्तं भवति- यथा देवदत्तो जानातीत्यादौ पिण्डविशेषवाचकोऽपि देवदत्तादि शब्द शरीरिणि पर्यवसानस्वभावेन चेतनमवगमयति तथा सर्वस्य चेतनाचेतनजातस्य परमात्मापेक्षया शरीरत्वेन तत्तद्वाचि शब्दाः परमात्मनि पर्यवस्यन्तीति। इत्थं च [1]'तत्वमसि' [2]'त्वं वा अहमस्मि भगवो देवते' [3]'इदं सर्व यदयमात्मा' [4]'सर्वं खल्विद ब्रह्म तज्जलानिति शान्त उपासीत' इत्यादयः प्रयोगा ऐकरस्येन समन्वयमुपयन्ति। यच्चेह परेषां स्वरूपैक्यमवलम्ब्य क्वचिन्निर्वहणं, क्वचित्तदसंभवेन बाधार्थमवलम्ब्य निर्वहणं, तदिद गतिभेदेन विगुणम्। स्वरूपैक्यस्य निरस्तत्वेन प्रपञ्चसत्यत्वसमर्थनेन च निरस्तं नामैतत्। (शिक्षापत्रेरर्थदीपिकाख्या या टीका, तस्योपरि श्रीरघुवीराचार्यवर्यैः यद् भाष्य कृतं तस्मादुद्धृतोऽस्ति विषयखण्डोऽयम्। अधिकजिज्ञासायां तत्रैवाथवा श्रीमद्भगवत्पाद्रामानुजार्यवर्यैः विरचिते 'वेदार्थसंग्रहे समासां श्रुतीनामर्थाः द्रष्टव्याः)

सोऽयमीश्वरः:- अखिलहेयप्रत्यनीकानन्तज्ञानानन्दैकस्वरूपः, ज्ञानशक्त्यादिकल्याणगुणगणविभूषितः, सकलजगत्सर्गस्थितिसंहारकर्ता, आर्तोजिज्ञासुरथार्थी ज्ञानीत्युक्तचतुर्विधपुरूषाणामप्याश्रयणीयः धमार्थकाममोक्षरूप चतुर्विधफलप्रदः, विलक्षणविग्रहयुक्तश्च।

**परमात्मनः अखिलहेयप्रत्यनीकत्वात् निर्गुणत्वम् –**

अखिलहेयप्रत्यनीकत्वन्नाम तमस्तेजीवत् सर्पस्य गरूडवत् विकारादिदोषाणां प्रतिभटत्वम्। यथा तेजसः समिधे तमो नहि गच्छति न वा सर्प. गरूडस्य सविधे याति

---

[1] छान्दोग्योपनिषत् 6/8/7
[2] बृहदारण्यकोपनिषत 1/4/10
[3] बृहदारण्यक 2/4/6
[4] छान्दोग्योपनिषत् 3/14/1

---

तथैव परमात्मनः सविधे प्राकृता दोषा अपि नहि यान्ति, केचिदाचार्याणां मते त्रिष्वपि प्रकारेषु जीवेषु भवन्ति दोषाः यथा-

बद्धानां दोषा मोहादयः, मुक्तानां दोषः प्रकृतिविमोकरूपः, नित्याना दोष परिच्छिन्नस्वरूपत्वम्, पारतन्त्र्यं च। (केचित्वृद्धाः नाद्रीयन्ते मतमेनम् परतु) अनेककल्याणगुणगणमहोदधौ परमात्मनि न एकोऽपि सूक्ष्मोऽपि प्राकृतगुणः अत एव उक्त भगवता स्वामिनारायणेन-

[1]'मायागुणैर्विहीनत्वात् निर्गुणः परमेश्वरः।
निजधामस्थ एवासौ सर्वत्र व्यापकोऽस्ति च।।'

तथा च

[2]गुणातीतो निर्विकारो ज्ञेयः सर्वेश्वरेश्वरः।
श्रेयार्थमेव जीवानां स्वेच्छया भाति मर्त्यवत्।।
तस्मिन्नल्पधियो मूढाः आसुरी प्रकृतिं श्रिताः।
दृष्टांतेनात्मनो दोषान् निर्दोषे कल्पयन्ति हि।।
दोषैस्तत्कल्पितैः कृष्णो दोषस्पृग्नैव जायते।
प्रत्युत प्रविशन्त्येव कल्पकेष्वेव तेऽखिलाः।।
अपि नाकृतिमेनं (ये) विद्युर्निर्दोषमञ्जसा।
सदोषा अपि ते तु स्युर्निर्दोषा तत्प्रतापतः।।

तथा च

[3]एवं सर्वनियन्तारं सर्वकर्तारमेव च।
तं यो विद्यात् स वै भक्तः प्रोक्तो द्रोहीतरस्तथा।।

अयं भावः- परमेश्वरस्य स्वेतरसमस्तसमष्टिव्यष्टिविशिष्टस्वरूपितस्थितिमत्तया ब्रह्ममुक्तकालमायाकर्मस्वभावानां तच्छरीरात्मकतया तदधीनतया तन्नियाम्यतया तत्कार्यतया तन्मूर्त्याहितसाकाराकृतितया तदाधारजीवनतया तत् सत्तासत्वतया तदन्तर्विशेषणतया तदधीनसन्नाहतया तत्तत्त्रितपिण्डतया तल्लग्नगुणद्रव्यजातिक्रिया विशेषसंसर्गाऽवकाशादिरूपतयाऽपृथक्सिद्धतादात्म्याऽवस्थितिकतया तु यद् वेदनं तत्

---

[1] श्रीहरिवाक्यसुधासिन्धुः त 66 श्लोक 10

[2] हरिवाक्यसुधासिन्धुः त 24 श्लो. 23-27

[3] श्रीहरिवाक्यसुधासिन्धुः त 202, श्लो 12

।।जयश्रीस्वामिनारायण।।

श्रीहरिवाक्यसुधासिन्धौ उपनिषदां प्रभाव:

---

श्रुतिमूलकयथार्थज्ञानम्। शरीरिण: परमात्मन: सर्वशरीरतया स्वतन्त्रदिव्यमूर्तेर्मुक्तमूर्तेरीश्वरात्मचेतनमूर्ते: साक्षिमूर्ते: स्वेच्छास्वीकृताऽर्चामूर्ते: प्राकृताऽप्राकृतयावच्छरीरिसुमूर्तस्य धृतदिव्यमानववेषस्य दिव्यत्वे सति मानवत्वं, मानत्वे सति दिव्यत्वम्, दिव्यमानवत्वे सति मूर्तत्वं, मूर्तिमत्वे सति दिव्यमानवमूर्तित्वमिति सदाऽऽनन्दधनैकरस सगुणसशक्तिसचमत्कारैश्वर्यसाकारसुदिव्यकिशोरवेषत्वं शाश्वतमिति यथार्थज्ञाने सति अद्रोहत्वमिति। तथा च भगवत्स्वरूपप्रतिपादका श्रुतय: स्मृतयश्च [1]'रूपं रूपं प्रतिरूपो बभूव' 'पूर्वमेवाहमासमिति तत्पुरूषस्य पुरूषत्व' [2]'आत्मैवेदमग्र आसीत् पुरुषविध' 'अथ पुरूषो ह वै नारायणोऽकामयत प्रजा: सृजेयेति' सत्यकाम: सत्यसंकल्प , 'परास्यशक्तिर्विविधैव श्रुयते स्वाभाविकी ज्ञानबलक्रिया च' 'य: सर्वज्ञ. सर्ववित्' 'तदैक्षत' 'स ऐक्षत' 'सोऽकामयत' 'रसो वै स·' 'यदा पश्य पश्यते रुक्मवर्णकर्तारमीशं पुरुषं ब्रह्मयोनिम्' 'हिरण्मय: पुरूषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णस्तस्य यथा कप्यासं पुण्डरीकमिवाक्षिणी' 'एतस्य पुरूषस्य रूपं यथा महारजन वास' 'समस्तकल्याणगुणात्मकोऽसौ' 'समस्तवेत्ता समस्तशक्ति: परमेश्वराख्य' 'भगवान् दिव्यविग्रह' 'यत्र पूर्वे साध्या· सन्ति देवा·' 'कल्पे कल्पे जायमान. स्वमूर्त्या' 'मया ततमिद सर्व जगदव्यक्तमूर्तिना' 'निरञ्जन. परमं साम्यमुपैति' 'परात्परं पुरूषमुपैति दिव्यम्' 'परं ज्योतिरूपसम्पद्य स्वेन रूपेणाऽभिनिष्पद्यते' 'पूतामद्भावमागता:' 'उत्तराच्चेदाविर्भूतस्वरूपस्तु' 'भोगमात्रसाम्यलिंगाच्च' सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता' 'समस्ता शक्तयश्चैता नृप यत्र प्रतिष्ठिता:। तद् विश्वरूपवैरूप्यं रूपमन्यद्हरेर्महत्।।' 'न तस्य प्राकृतामूर्तिर्मांसमेदोऽस्थि संभवा:' 'न भूतसंघसंस्थानो देहोऽस्य परमात्मन:' 'स वै किलाऽयं पुरूषो पुरातनो य एक आसीदविशेष आत्मनि' 'तं ब्रह्म परमं साक्षाद् भगवन्तमघोक्षजम्। मनुष्यदृष्ट्या दुष्प्रज्ञा मर्त्यात्मानो न मेनिरे' इत्यादिषु दिव्य सुमूर्तपरमात्मनो रूपनिराकारनिर्गुणनिर्धर्मकत्वादिकथन बोधनादिद्रोहो बोध्य: तानेतान्- [3]'तानहं द्विषत: क्रूरान्संसारेषु नराधमान्। क्षिपाम्यजस्त्रमशुभा नासुरीष्वेन योनिषु' [4]'आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि। माम प्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्' 'मूढोऽयं नाऽभिजानाति लोको मामजमब्यंयम्' इत्यादिभिर्द्रोहफलस्योक्तत्वात् श्रीहरिवाक्यसुधासिन्धौ श्रीहरिणा तु - 'पर्वतवृन्दलादितनुवत्वमुक्तं यत्रन्यक्कारमात्रावस्थानं मोक्षयोगाऽभावश्चेति जीवनाशात्मकफलमुक्तम्।

किञ्च 'स एक्षतेति' ब्रह्मलोके भगवतो दिव्यचक्षुर्भ्यामीक्षणवत्ताया. कथनात्, विना मूर्तिमीक्षणाद्यसंभवात्, परिपूर्णदिव्यपादादिमत्वं दिव्यानन्दघनमूर्त्यात्मकैकरस सुमूर्तत्व सर्वगुणशक्तिसामर्थ्यैश्वर्यानन्दप्रीतिमत्व वर्तते शाश्वतमिति, परमेश्वरस्य पुरूषविधस्य दिव्यानन्दघनकिशोरस्य, सदादिव्यमुक्तपूज्यध्येयादिगोचरत्वात्, करचरणादि रहितो यदि परमात्मा। अपाणिपादो जवनो ग्रहीता' इत्यादिभिर्मन्यतेऽथ च चन्दनादिभि. पूज्यते,

---

[1] उत्तरानुवाक्-2

[2] बृहदारण्यकोपनिषत् 1/4/1

[3] भ गी 6/19

[4] भ गी 16/20

।।जयश्रीस्वामिनारायण।।
श्रीहरिवाक्यसुधासिन्धौ उपनिषदां प्रभाव:

---

आचार्यगुरूभगवदर्चाद्यात्मा परमात्मा तर्ह्यपि मायाबिम्बपूजनं तन्मते वस्तुसत्वस्याऽपूजनात् नर्मकर्ममात्रमेव भवेत्, तदपि द्रोह: स्यात्, तैस्तु द्रोहार्थ न पूज्यते। अथ तर्हि अनमार्य सत्यचन्दनार्हं दिव्यं मूलं रूपं सिद्धमेवेति सुमूर्तत्वमेव परमात्मन:। (भगवन्निष्ठविश्वकतृहतृत्वादेर्न माननं कालमायाकर्मस्वभावान्यतमस्वतन्त्रनिजीयकतृत्वादिमाननं भगवतो द्रोह: कतृत्वविषयक:, चक्रवर्ति शासनं परित्यज्य तत्खण्डीयराजशासनं प्रधानं मन्यते स द्रोहस्तद्वान् महासाम्राज्य सत्ता द्रोह: स्यात्। एवं सुमूर्तेऽपिराजनि नासिकाश्रोत्ररहित पाणिपादादिरहित बुद्धयादिरहितलिखितपत्र प्रसारणादि मूर्तिद्रोहस्तद्वान् राजस्वरूपद्रोहवान् स्यात्, एवं सर्वसत्तस्य सूमूर्तस्य श्रीहरे: खण्डनं सत्तागोचरं मूर्तिगोचरं चाऽकृत्वाऽमूर्तत्वादिरूपं तत्सर्वथा द्रोहरूपम्। एवं विधं द्रोहं न करोति तेन तु सहस्त्रशो भगवत्पूजा: कृता: इति मन्यते भगवान्, तद्विना सहस्त्राधिचन्दनादिपूजकोऽपि द्रोह्यस्त्येव। ऋगवेदोपनिषत्संहितायां सामवेदोपनिषत्संहितायां यजुर्वेदोपनिषत्संहितायाम्, अथर्ववेदोपनिषत्संहितायां तथा मूलवेदात्मकव्यूहेष्वपि च परमात्मन. शरीरिण. साकारमूर्तेरिव वर्णनात् 'पुरूषविध.' 'आदित्यवर्णं पुरूषम्' इत्यादिभि: सम्यक् सर्वांगसम्पूर्णभगवत्स्वरूपं सुमूर्त किशोर: नन्दघनं वर्णितम्। यदनुरूपा मुक्ता ईश्वरा देवा मानवाद्या. क्लृप्ता: सम्पादिता., स्वेनैवेति दिव्यसुमूर्तं यथार्थं तद्वेदनं च, तत्तुमूढधीयामसुबोधं तत्र दिव्यस्वरूपबोधनेऽपि 'मुह्यन्ति यत्सूरय:' 'मूढा नैवाभिजानन्ति मद्भावपरमं त्विति'। असमर्थ्यवत्त्वेन विदुषां सुराणामपि तत्र मोहो भ्रमो गदित:। भगवतासाधुयोगिरूपै: स्वस्वरूपपुरूषदिव्यमूर्तता बोधनार्थं सांख्यादीनि शास्त्राणि प्रवर्तितानि यत्र- 'पुरूषोऽस्ति भोक्तृ भावात्' 'पुरूषविशेष: परमेश्वर.' 'ध्येय: परमेश्वर:' 'प्राप्य: परमेश्वर:' इत्यादिभिर्वाक्यै: परमात्मा साकारो वर्णित:।

**ब्रह्मण उभयलिंगत्वम् –**

स्वत एव सदानिरस्तसमस्तहेयत्वं स्वाभिविकानन्तकल्याणगुणवत्वं चोभयलिंगमित्यभिधीयते। भगवानपि श्रीहरिवाकयसुधासिन्धौ भगवद्गुणानां, प्राकृतापगुणाना रहितत्वं च प्रतिपादितवानस्ति भगवति यथा-

[1]सच्चिदानन्दरूपोऽतिलावण्यो दिव्यविग्रह:।
योऽप्राकृतेन्द्रियो दिव्यवासोऽलंकारमण्डित:।।
कोटिकन्दर्पसौन्दर्य: शांतमूर्तिर्दयानिधि:।
एकैकरोम निर्गच्छत्कोटि कोर्य्यक तेजसा।।
अनंतकोटिब्रह्मांडमहाराजो महेश्वर:।
कालकाल: स्वतन्त्रश्च नियंता सकलात्मनाम्।।

[1]गुणातीतो निर्विकारोज्ञेय:सर्वेश्वरेश्वर:,

---

[1] श्रीहरिवाक्यसुधासिन्धु. त 126, श्लो 23, 24, 25

---

शतानन्दमुनिरपि सत्संगिजीवने

[2]नराकृति परंब्रह्म स्थितो योऽक्षरधामनि।
निर्गुणो निर्विकारश्च, सच्चिदानन्द लक्षणम्।।
नित्यासंख्येयकल्याणदिव्यसद्गुणमण्डित:।।

असाधारणधर्मतयैनयोर्ब्रह्मण इतरवैलक्षण्यानुमापकत्वात्। यद्यपि निरस्त हेयत्व मुक्तानामस्ति अथापि न तत् सदा तेषाम्। सदातनमपि तन्नित्यानां न स्वत, नित्यभगवत्संकल्पाधीनत्वात्तेषां तथात्वस्य। एवं सदा कल्याणगुणवत्वमपि तेषां परसंकल्पौपाधिकत्वान्न स्वाभाविकमिति बोध्यम्। तथा च वर्णित श्रीवत्सांकमिश्रै:-

इच्छात एव तव विश्वपदार्थसत्ता,
नित्यं प्रियास्तव तु केचन ते हि नित्या.।
नित्यं त्वदेकपरतन्त्र निजस्वरूपा,
भावक्तमंगलगुणा हि निदर्शनं न:।।

स्वत एव सदा निरस्तसमस्तहेयत्वं तावत् श्रूयते परमात्मन.- [3]'नैतं सेतुमहोरात्रे तरतो न जरा न मृत्युर्न शोको न सुकृतं न दुष्कृतम् सर्वे पाप्मानाऽतो निवर्तन्ते अपहतपाप्मा ह्येष ब्रह्मलोक:' इति। अत्र तरति: प्राप्तिवचनो वेदान्तं तरतीतिवत्। एत नोल्लंघन इति व्याख्याने तु सदा सर्वहेयानामत्रैवावस्थानं प्रतीयते। तथा च 'सर्वे पाप्मानोऽतो निवर्तन्ते' इत्याद्युत्तरसन्दर्भो विरूध्येत्। अहोरात्रयो: परिच्छेदकत्वेन प्राप्ति, कर्मणश्च वशित्वेन प्राप्ति: प्रसक्ता प्रतिषिध्यते। अपहतपाप्मत्वं च कर्मसामान्यप्रतिभटत्वं इति तु पूर्वोक्तम्, कृतेऽपि कर्मणि तत्तत्फलजननशक्त्युत्पादप्रतिरोधकत्वलक्षणम्। [4]'न सुकृतं न दुष्कृतं सर्वे पाप्मान इति पुण्यस्यापि पाप्मन् शब्देन क्रोडीकाराच्चापहतपाप्मेत्यादौ पाप्मन् शब्देन कर्मसामान्यमेव विवक्षितम्। एवं भूतत्वात्कर्मवश्यत्वतत्कृतशोकादीनां सदा ब्रह्मण्य प्राप्ति रितिभाव:। अत एवोदिति नामास्य श्रूयते- [5]'तस्योदिति नाम स वा एष सर्वेभ्य पाप्मभ्य उदित:' इति। स्वरूपापनुबन्धिनाम चेदं सदा स्वत एव कर्मोद्गतत्व एवास्य संगच्छते। [6]'एष आत्मा अपहृत पाप्मा विजरो विमत्युर्विशोकोविजिघत्सोऽपिपास: सत्यकाम सत्यसंकल्प:' इति श्रुतिश्च परस्य ब्रह्मण: सर्वं हेयजातं प्रतिषिध्य कल्याण गुणान्

---

[1] श्रीहरिवाक्यसुधासिन्धु: त 24, श्लो. 23
[2] सत्संगिजीवनम् प्र। श्लो 2-9
[3] छान्दोग्योपनिषत् 8/4/2
[4] स्वसंवे 2
[5] छान्दोग्योपनिषत् 1/6/7
[6] छान्दोग्योपनिषत् 8/1/5

विदधाति। अशनायापिपासे शोकमोहौ जरामृत्यू इत्यूर्मिषट्कं व्यावर्त्यतिऽपहतपाप्मेत्यादिना पदषट्केन। तत्र मोहस्य देहात्मभ्रमादिलक्षणस्य [1]'अनृतेनहि प्रत्यूढा:' इत्यनृतशब्दित सांसारिकफलकर्महेतुकत्वात्कर्मनिवृत्तिप्रतिपादकेनापहतपाप्मेत्यनेन तन्निवृत्तिरर्थसिद्धा। कर्मफलशोकादिराहित्यं तु स्वशब्देनैव प्रतिपादितम्। यद्यपि मुक्तानांमपहतपाप्मत्वादिकमस्ति परंतु तत्तिरोधानार्हम्। संसारकाले हि तिरोहितं तत्कर्मणोपासनाप्रीतभगवत्प्रसादेन प्रकृतिबन्धविनिर्मोकपूर्वकं पुरूषोत्तममुपसन्नस्य चाविर्भवति। तथा च सूत्रम्- [2]'पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ' [3]'सम्पाद्याविर्भाव: स्वन शब्दान्' [4]'उत्तराच्चेदाविर्भूतस्वरूपस्तु' इति। परमात्मा तु नित्याविर्भूतस्वत सिद्धापहतपाप्मत्वसत्यकामत्वादि:। [5]'एष सर्वेश्वर एष भूताधिपतिरषभूतपाल' '[6]प्रधानक्षेत्रज्ञपतिर्गुणेश:' इत्यादिवाक्यैरसंकोचान्नित्यानामपि नियन्तृत्वेन स्वामित्वेन च प्रतिपन्नस्य परमात्मन एव तद्गुणानामपि व्यवस्थापकत्वम्। [7]'पत्यादिशब्देभ्य' इति सूत्रे च त्रिविधानपि चेतनान् प्रति स्वामित्व नियन्तृत्वादिकं परब्रह्मणो निरूपित नित्यास्ता तावत्।

श्री विष्णुपुराणेऽपि हेयगुणादिरहितत्वंकल्याणगुणाद्याश्रयत्व च परतत्त्वभूतस्यैव परमेश्वरस्य वासुदेवस्य प्रतिपाद्यते- 'समस्त हेयरहितं, विष्ण्वाख्यं परमं पदम्'। 'गुणादिदोषांश्च मुने व्यतीत:' 'समस्तकल्याणगुणात्मकोऽसौ' 'तेजोबलैश्वर्यमहावबोधसुवीर्यशक्त्यादिगुणैकराशि:। पर: पराणां सकला न यत्र क्लेशादय. सन्ति परावरेशे।। इति। गुणादिसामान्य निषेधे तु दोषपदं व्यर्थम्। गुणादीश्च व्यवतीत इत्येव हि तदानीं वचनं पर्याप्तम्। 'सत्वादयो न सन्तीशे यत्र च प्राकृता गुणा·' 'आह च योगानन्दमुनि:- 'प्रकृतिमयागुणा न च भवन्ति हि यत्र हरौ, इति निगमागमा अपि वदन्ति च निर्गुणकम्।' तथा चाह वेकुण्ठस्तवे कूरेश सूरि:' दूरे गुणास्त्वयि तु सत्व रतस्तमांसि, तेन त्रयि प्रथयति त्वयि निर्गुणत्वम्।' इति प्राकृतगुणानां विशिष्यनिषेधवचनं चाऽप्राकृतगुणसद्भावाभिप्रायेण। गुणसामान्यनिषेधे विवक्षिते च प्राकृतपदमनर्थकं स्यात्।

श्रीमद्भागवतेऽपि- ज्ञानानन्दस्वरूपस्यैव परस्य ब्रह्मणोऽनन्तगुणवत्वं प्रतिपादितम्- 'मय्यनन्तगुणे ब्रह्मण्यानन्दानुभवात्मनि।' 'मां भजन्तिगुणास्सर्वै: निर्गुणं निरपेक्षकम्' 'यो वा अनन्तस्य गुणाननन्ताननु क्रमिष्येत्स तु बालबुद्धि:' इत्यादि। नित्यत्वं चैषां [8]'त इमे सत्या: कामा:' 'एते चान्ये च भगवन्नित्या यत्र महागुणा:।' इत्यादि श्रुतिस्मृतिसिद्धम्। आविद्यत्वे तु गुणानामविद्यानिवृत्तौ निवृत्यवश्यं भावेन नित्यत्वायोग.। एवं नि·सीमत्वं च 'योऽस्याध्यक्ष:

---

[1] छान्दोग्योपनिषत् 8/3/2
[2] शारीरकमीकांसा 3/2/4
[3] शरीरकमीमांसा- 4-4-1
[4] शारीरकमीमांसा 1/3/18
[5] बृहदारण्यकोपनिषत् 4/4/21
[6] श्वेताश्वतरोपनिषत् 6/16
[7] शारीरकमीमांसा 1/3/44
[8] छान्दोग्योपनिषत् 8/3/1

परमे व्योमन् सो अंग वेद यदि वा न वेद' 'न ते विष्णो जायमानो न जात: देव महिम्न: परमन्तमाप' इत्यादिश्रुतिसिद्धम्, श्रीहरिवाक्यसुधासिन्धावपि भगवद्गुणानां नित्यत्वम्, अपरिच्छिन्नत्वं चाऽभिहितमस्ति -

[1]'जातो गुणेभ्य: सद्भ्यो य: स्नेह: स तु भवेद्दृढ:।
तत्र कृष्णे नित्यसिद्धा: सन्ति ते त्वनपायिन:।।'

सत्संगिजीवने च-

'स्वरूपं च स्वभावश्च विभूतिश्च तथा गुणा:।
नित्या: सन्ति हरौ ह्येतेऽन्यत्र त्वागन्तुका मता.।'

एवं तत्वप्रकरण एव श्रुतिस्मृत्यो: परस्य ब्रह्मणो निर्दोषत्वस्येव समस्त कल्याणगुणाकरत्वस्य प्रतिपादनात् गुणानां मायिकत्वमेवेति कल्पनाया नावसर इति स्थितम्। निर्गुणश्रुतिनां तात्पर्यं च महर्षिभिरेव वर्णितम्-'योऽसौ निर्गुण इत्युक्त· शास्त्रेषु जगदीश्वर:। प्राकृतैर्हेयसंयुक्तैर्गुणैर्हीन: स उच्यते। इति। निर्गुणशब्दस्य निरूक्तिश्च- 'स्थितोऽपि नीरक्षीरवज्जगतोऽस्पर्शनाद्गुणै:, उक्त. स निर्गुण: इति। सत्वादिगुणवश्यत्वाभावो निर्गुणत्वमिति यावत्।

यत्तु 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' इति वाङ्मनसागोचरत्व प्रतिपादनान्निर्गुणत्वं फलति। सगुणमेव हि वस्त्विदमित्थमिति गृहीतुं प्रतिपादयितुं वा शक्यत इति तत् श्रुत्यक्षरापर्यालोचनकृतम्। 'यद्वाचो न स्पृशन्ति मनसा सहे' ति हि तदा वचन शैली साधीयसी। अत्र तु किञ्चित्स्पृष्ट्वा साकल्येन गृहीतुमत्यादरेण प्रवृत्तयो पारानुपलम्भेन प्रतिनिवृत्तिरेव प्रतिपाद्यते। प्रतीयमानानां ब्रह्मगुणानां सीमानं तु वेदपुरूषोऽपि वाचा प्रतिपादयितुं किं बहुना मनसा चिन्तयितुमपि नाशक्नोदितियावत्। एवं चापरिच्छिन्नगुणकत्वमेव वाङ्मनसनिवृत्तिकथनेन सिद्ध्यति न निर्गुणत्वम्। निर्गुणत्वेन ज्ञानाविषयत्वविवक्षायां तु [2] 'ब्रह्मविदाप्नोति परम्' 'आनन्दं ब्रह्मणो विद्वान्' इति पूर्वापरवाक्यविरोधश्च।

अनन्तत्वात्स्वरूपगुणादिभिरेतावदिति परिच्छेदायोग्यं ब्रह्म परिच्छिद्यज्ञानवतां तदज्ञानम्। परिच्छिन्नत्वेनाजानतां च ज्ञातं भवतीत्युच्यते- [3]'अविज्ञातं विजानतां विज्ञातमविजानताम्' इति। परिच्छिन्नत्वेनाज्ञानं च परिच्छिन्न चिदचित्प्रपञ्चवैलक्षण्येन ज्ञानमेव भावान्तरत्वादभावस्येति विज्ञातमविजानतामिति साधूपपद्यते। ज्ञानसामान्याविषयत्व विवक्षाया तु

---

[1] श्रीहरिवाक्यसुधासिन्धु: त 80. श्लो 10
[2] तैत्तिरीयोपनिषत् आन 2/1/1
[3] केनोपनिषत् 2/3

विज्ञातत्वकीर्तनं विरूध्येत। पूर्वं हि [1]'तदैव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते' इति प्राकृतजनोपसेव्यमिदंकारगोचरं प्राकृत शब्दादिमयं परिच्छिन्नं वस्तुव्यवच्छिद्यापरिच्छिन्नमप्राकृत स्वासाधारणाकारं परंब्रह्मैव मुमुक्षुस्त्वमुपास्स्वेति प्रतिपादितम्। न वात्रोपास्यसामान्य वैलक्षण्य विवक्षितम्। तदात्वे 'नेदं यदिदमुपासते' इत्येव पर्याप्तत्वात् द्वितीयेदम्पदवैर्थ्यप्रसगात्। अस्माकं तु परिच्छिन्नपरतया सार्थक्यम्। ब्रह्मोपासनस्यैव नि:श्रेयस हेतुत्वात् ब्रह्मणि उपास्य सामान्यवैलक्षण्य प्रतिपादनायोगश्चेति। तस्मात्परिच्छिन्न व्यावृतितपरप्रकरणानुगुण्येनापि ब्रह्मणि परिच्छिन्नत्वेन ज्ञानस्या ज्ञानतवं मेवात्र विवक्षितम्। आवश्यकं हि पूर्वोत्तर सन्दर्भपर्यालोचनम् वाक्यार्थविनिश्चये। अत एव च न्यायविदामुद्घोष- 'पूर्वापरामृष्ट शब्दोऽन्यां कुरूते मतिम्' इति। एव च ब्रह्मणोऽज्ञातत्ववचनं न निर्गुणत्वात् 'किन्त्वपरिच्छिन्नत्वादिति सिद्धम्। एतेन शब्दागोचरत्वमपि व्याख्यातम्। शब्दा अपि हि वैदिका वेदोपबृंहणभूताश्च ब्रह्मणो गुणादीन् वर्णयितुं प्रवृत्ता, यथा शक्तिविविच्य पार गन्तुमशक्नुवन्तस्तेषामपरिच्छिन्नत्वमेव प्रतिपाद्य श्राम्यन्ति। तथा चोपवर्णितं यामुनमुनिभि- 'उपर्युपर्यब्जभुवोऽपि पूरूषान् प्रकल्प्य ते ये शतमित्यनुक्रमात्। गिरस्त्वदेकैक गुणावधीप्सया सदा स्थिता नोद्यमतोऽति शेरते' इति। अत: स्वरूपतो गुणैश्चापरिच्छिन्न ब्रह्मेयत्तया शब्देन प्रतिपादयितुं मनसा चिन्तयुतुं वा न शक्यमिति स्थितम्।

हेयसामान्यशून्यत्व कल्याण गुणाकरत्व लक्षणोभयलिंगप्रवृत्तिनिमित्तिकश्च भगवच्छब्द परस्मिन्नेव ब्रह्मनि वासुदेवे नित्यशुद्धेऽपरिच्छिन्नविभूतिके सर्वकारणे मुख्यवृत्त इति श्रीविष्णुपुराणे प्रतिपाद्यते-

'शुद्धे महाविभूत्याख्ये परे ब्रह्मणि शब्यते।
मैत्रेय भगवच्छब्द: सर्वकारणकारणे।।'

तथा च

'उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम्।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति।।'

परमते त्वविद्योपहितस्य जगत्कारणस्याशुद्धत्वात्सगुणस्य चापरब्रह्मत्वान्निर्विशेषे च ब्रह्मणि प्रवृत्ति निमित्तानन्वयाज्जगत्कारणे शुद्धे परस्मिन् ब्रह्मणि भगवच्छब्दमुख्यवृत्तिप्रतिपादनस्यायोग:। किञ्च [2] 'अथात आदेशो नेति नेति' इति निषेधमुखेन प्रतिबोधितस्यैव परस्य ब्रह्मणो नामकीर्त्यते- [3]सत्यस्य सत्यमिति एतेन-परस्यब्रह्मण: शब्दागोचरत्वमेव, अविद्योपहितस्यैव ब्रह्मादिशब्दवाच्यत्वमित्यपि परास्तम्।

---

[1] केनोपनिषत् 1/4
[2] वृहदारण्यकोपनिगत्- 2/3/6
[3] बृहदारण्यकोपनिषत् 2/1/20

।।जयश्रीस्वामिनारायण।।

श्रीहरिवाक्यसुधासिन्धौ उपनिषदां प्रभाव:

---

श्रीहरिवाक्यसुधासिन्धौ सत्संगिजीवनेऽपि निर्दोषत्वं समस्तकल्याणगुणाकरत्वं च तेषु तेषु स्थलेषु समुपवर्णिति- 'गुणातीतो निर्विकार:' 'परात्पर: शुद्ध:' 'मायागुणैर्विहीनत्वान्निर्गुण परमेश्वर:' 'भगवान् पुरूषोत्तम:' 'सर्वदैवातिशुद्धोऽस्ति स्वतन्त्रोऽविक्रयस्तथा' 'अनन्तकल्याणगुणरत्नाब्धि:' 'निर्गुणं सद्गुणगण हरिम्' 'एवं हि भगवानेको भूयास सन्ति तद्गुणा:' 'निर्गुणो निर्विकारश्च सच्चिदानन्दलक्षण:' 'नित्यासख्येकल्याणदिव्यसद्गुणमण्डित । सेवितश्च भगै: षड्भि:' 'अप्राकृत गुणो विष्णु निर्गुणश्चेश्वरेश्वर ' 'अनन्तकल्याणगुण स ज्ञेय: पुरूषोत्तम: ।इति।

**षाड्गुण्यविवरणम् –**

संख्यातुं नैव शक्यन्ते गुणा दोषाश्च शांङ्गिण: ।  
आनन्त्यात्प्रथमो राशिरभावादेव चान्तिम: ।।  
न हि तस्य गुणा. सर्वे सर्वैर्मुनिगणैरपि ।  
वक्तुं शक्या वियुक्तस्य सत्वाद्यैरखिलैर्गुणै· ।।  
यथा रत्नानि जलधेरसंख्येयानि पुत्रक ।  
तथा गुणा ह्यनन्तस्य ह्यसंख्येया महात्मन. ।।  
इषुक्षयान्निवर्तन्ते नान्तरिक्षक्षितिक्षयात् ।  
मतिक्षयान्निवर्तन्ते न गोविन्दगुणक्षयात् ।।

चतुमुखायुर्यदि कोटिवक्रो भवेन्नर: क्वापि विशुद्धचेता: ।  
स ते गुणानामयुतैकदेशं वदेन्नवा देववर प्रसीद ।।  
महात्मन· शंखचक्रासिपाणेर्विष्णोजिष्णोर्वासुदेवात्मजस्य ।  
वर्षायुतैर्यस्य गुणा न शक्या वक्तुं समेतैरपि सर्वलोकै· ।।

इत्यादिवचनैरसंख्येयगुणवत्वेन प्रतिपन्नस्यापि भगवत: सृष्ट्याद्युपयोगितया प्राधान्येन षड्गुणा गण्यन्ते। ज्ञानशक्तिबलैश्वर्यवीर्यशक्ति तेजांसि नाम। एतत्विततिरूपत्वं चान्येषा गुणानामुच्यते- 'तवानन्त गुणस्यापि षडेव प्रथमे गुणा.' इति। वर्णितं च श्रीवत्सांकमिश्रैर्वरदराजस्तवे-

'प्रकृष्टं विज्ञानं बलमतुलमैश्वर्यमखिलम्,  
विमर्या वीर्यं वरद परमा शक्तिरपि च ।  
परं तेजश्चेति प्रवरगुणषट्कं प्रथमजम्,  
गुणानां नि:सीम्नां गणनविगुणानां प्रसवभू: ।।'

एतेषां स्वरूपं च वर्णितम्-

अजडं स्वात्मसम्बोधि नित्यं सर्वावगाहनम् ।  
ज्ञानं नाम गुणं प्राहु: प्रथमं गुणचिन्तका: ।।  
जगत्प्रकृतिभावो य: सा शक्ति: परिकीर्तिता ।

श्रमहानिस्तु या तस्य सततं कुर्वतो जगत्।।
बलं नाम गुणस्तस्य कथितो गुणचिन्तकैः।
कतृत्वं नाम यत्तस्य स्वातन्त्र्य परिबृंहितम्।।
एश्वर्यं नाम तत्प्रोक्तं गुणतत्वार्थचिन्तकैः।
तस्योपादानभावे हि विकारविरहो हि यः।।
वीर्यं नाम गुणः सोऽयमच्युतत्ववपराह्वयः।
सहकार्यनपेक्षाया तत्तेजः समुदाहृतम्।। इति।।

स्वाभाविकनित्यसर्वापरोक्षलक्षणं भगवतो ज्ञानम्। अघटितघटनासामर्थ्यं शक्तिः, विश्वस्य धारणसामर्थ्यं बलम्, नियमन सामर्थ्यमैश्वर्यम्, सत्यपि हेतौ विक्रियाविरहलक्षणं वीर्यम्, पराभिभवसामर्थ्यं तेजः, इत्यपि सुवचम्। नामसहस्त्रे च 'महोत्साहः' इति निरवधिकमैश्वर्यम्, 'महाद्युतिः' इति प्रकृष्टं तेजः, 'महाबलः' 'महाबुद्धिः' 'महावीर्यः' 'महाशक्ति इति च तथाविधा बलबुद्धिवीर्यशक्तयो भगवतः प्रतिपाद्यन्ते।

पूर्वं जीवनिरूपणसमये जीवाद्वैतब्रह्माद्वैतविषयकीचर्चा सञ्जाता, अनेन सिद्धयति यत् जीवाः परमात्मान. भिन्नाः तथा चाह भगवान्-

[1]''न तु कोऽपि भवेत्क्वापि, पुरूषोत्तमसन्निभ.।
एक एवेत्यतो वेदैर्गीयतेऽनुपमो हि स।।'

[2]आत्मात्मा चाक्षरात्मा च सोऽस्ति कृष्णः परात्परः।
ब्रह्मरूपानंतकोटिमुक्तसंघनिषेवितः।।

'नित्यो नित्यानोमित्यादयः श्रुतयः विषयेऽस्मिन् प्रमाणभूताः।

**परमात्मनः जगत्कारणता –**

तथा च मायानिरूपणसमयेऽस्मिन्नेवाध्याये विविधमतखण्डनपूर्वकभगवत. जगत्कारणता प्रतिपादिताऽस्ति, अतोऽत्रातिसंक्षेपेणोच्यते-

पिल्लैलोकाचार्याः महाभागाः तत्वत्रयनाम्नि स्वग्रन्थे विषय मिदमवलम्ब्य लिखति यत्- 'तस्मादीश्वर एव जगतः कारणम्' अस्य च कारणत्वं नाविद्याकर्मपरनियोगादि हेतुकम्, अपितु स्वेच्छाप्रयुक्तम्, संकल्पमात्रेणकरणाज्जगत्सृष्टिर्नायासाय भवति, अस्या. प्रयोजन लीलैव

---

[1] श्रीहरिवाक्यसुधासिन्धुः त. 106 श्लो. 15/16
[2] हरिवाक्यसुधासिन्धु. त 118 श्लो 27

---

केवलम्, तर्हि संहारदशायां लीलाया भंगस्स्यादिति चेन्न संहारस्यापि लीलात्वात्, स्वयमेव जगद्रूपेणपरिणमनादयमुपादानकारणमपि भवति। तर्हि निर्विकारोक्ति: कथमिति चेत्- स्वरूपस्य विकाररहितत्वात्। तर्हि कथं परिणामो भवतीति चेत्- विशिष्टविशेषणसद्वारकतया, न खलु कस्यचिदूर्णनाभेर्यस्स्वभाव: स: सर्वशक्तेर्न सम्भवति। ईश्वरेण कियमाणा सृष्टिर्नाम- अचित: परिणमनम्, चेतनस्य शरीरेन्द्रियप्रदानपुरस्सरं ज्ञानस्य विकासनं च, स्थितिकरणञ्च सस्यानां जलधारावत् सृष्टिषु वस्तुस्वनुप्रविश्य स्थित्वा सर्वविधरक्षाकरणम्। संहरणं नाम अविनीतस्यपुत्रस्य पित्रा कियमाणं निगऽबन्धनमिव विषयान्तरेष्वपि प्रसक्तानां करणानां भञ्जनम्, कांश्चितसुखिन: कांश्चिन्दुखिनश्च सृजत ईश्वरस्य "वैषम्यनैघृण्ये प्रसज्येयातामिति चेन्न, कर्मणा हेतुना तथा करणात्, मृद्भक्षकशिशुशिक्षकमातृन्यायेन हितपरतया करणाच्च।

भगवस्वामिनारायणाभिमत- औपनिषदसिद्धान्तसंसिद्धपरब्रह्मस्वरूपनिरूपणम् यथार्थरूपेण ज्ञानायात्र सर्वतन्त्रस्वतन्त्र श्रीकृष्णवल्लभाचार्य महाभागै विरचित 'श्री स्वामिनारायणवेदान्तसारस्थ· कश्चित्खण्डोऽत्र प्रस्तूयते-

पं. श्रीकृष्णवल्लभाचार्यमहाभागानां परब्रह्मविषयकं मतम्।

**परब्रह्मलक्षणानि –**

अथ परब्रह्म निरूप्यते। सर्वेश्वरत्वम्, सर्वशेषित्वम्, सर्वकर्माऽऽराध्यत्वम्, सर्वकर्मफलप्रदत्वम्, सर्वाधारत्वम्, सर्वाकार्योत्पादकत्वम् स्वज्ञानेतरसमस्तद्रव्यशरीरकत्वम्, सर्वव्यापकचेतनत्वम्, स्वत·सत्यसंकल्पत्वम् स्वरूपतो- गुणतश्च यस्मिन्नवधिकबृहत्व तत्वम्, मुक्तप्राप्योत्तमपुरूषत्वम् जगज्जन्मस्थितिलयकारणत्वम्, स्वतो निरस्तनिखिलदोषत्वम्, स्वत कल्याणगुणाकरत्वम्, स्वतो ज्ञानाद्यनन्तकल्याणगुणयोगहेयप्रत्यनीकत्वम्, निरवधिकनियामकचेतनत्वमित्यादीनि लक्षणानि ज्ञेयानि।

**परब्रह्मण: सर्वेश्वरत्वम् –**

परंब्रह्म- स्वरूपतो गुणतश्च यस्मिन्नवधिकबृंहत्वं तदित्यर्थ:।। भगवान- निरस्तरिखिलदोषत्वकल्याणगुणाकरत्वोभयलक्षणोपेत:, अस्य ज्ञानाद्यनन्तकल्याण गुणयोग हेयप्रत्यनीकत्वोभयं हि प्रवृत्तिनिमित्तमिति। पुरूषोत्तम:- मुक्तानां प्राप्यतयोत्तमपुरूष। द्वाविमौ पुरुषो लोके क्षरस्चाक्षर एव व। क्षर· सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते। उत्तम. पुरूषस्त्वन्य: परमात्मेत्युदाहृत:। यो लोकत्रयमाविस्य बिभर्त्यव्यय ईश्वर। ईश्वर

इति परमेश्वरपदम्। यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तम:। अतोऽस्मि लोके वेदे च प्रथित. पुरूषोत्तम:'' इति स्मृते:। ईश्वरमुक्तादौ न निरूपधीश्वरत्वम् अत्र तु निरूपधीश्वरत्वमिति।

## परब्रह्मण: सर्वशेषित्वप्रतिपादनम् –

हृदये जीव: कर्मणा नियन्त्रित: परमेश्वरोऽपि पुनस्त नियन्त्रयतीति। जीवस्तु सुक्ष्म: परमेश्वरो महान् विभुरपि सर्वान्तर्यामित्वेन रूपेण सूक्ष्मतम इति। अणोरणीयान् महतो महियानिति श्रुते:। जीवस्तु भोक्ता परमेश्वरो न भोक्ता। 'द्वा सुपर्णा सयुधा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्य: पिप्पलं स्वाद्वति अनश्नन्योऽभिचाकशीती''ति श्रुते:। स. जीवस्य कर्मफलप्रदाता, तत्तदाराधिनेन तत्तच्छरीरक: स्वयं प्रसन्नो भूत्वा फलं प्रयच्छतीति। स चाऽक्षरब्रह्म पर्यन्तानामुपास्य, मुक्तब्रह्मादयस्तु न स्वातन्त्र्येण मुख्योपास्या: मुक्तादीनां परब्रह्मविशेषत्वेन रूपेणापास्यतवं त्वप्रतिषिदम्, गुणविशिष्टस्येवविभूत्यादिविशिष्टस्य शरीरिण. परब्रह्मण उपास्यत्वात् उपासनाविषयं नोभयं मुख्यं विशेषणस्य गौणत्वात् विशेष्यस्य मुख्यत्वाच्चेति।

## परब्रह्मण: सर्वोपास्यत्वम् –

परमात्माऽक्षरधामनि नित्यं द्विबाहु. अन्यत्र स्वभक्तभावनानुकूलस्वेच्छयाचतुर्भुजाऽस्तभुजसहस्त्रभुजादिरूपं दर्शयतीति। तत्र शिक्षापत्री श्लोकभाष्यम् प्रमाणम्। स च सर्वज्ञ: सत्यसंकल्प: सर्वकर्मफलप्रद.। अन्तर्यामी सर्वशक्तिसेवित: परमेश्वर: इति। 'सर्वत्रैवाऽन्वित: शक्त्या च। श्रुतयश्च 'योऽक्षरे तिष्ठन्नक्षरादन्तर:'' ''अक्षरात्परत: पर:'' ''यस्तमसि तिष्ठन् तमसोऽन्तरो य. स्वभक्तेभ्यो रमते; स सर्वस्व इति।। विष्णुपुराणे- ''शुद्धे महाविभूताख्ये परे ब्रह्मणि शब्द्यते। मैत्रेय। भववच्छद. सर्वकारणकारणे'' इति। ''यत्रैश्वर्याणां पराकाष्ठा स सर्वस्वामी नारायण परमेश्वर: परब्रह्माऽक्षरातीत: पुरूषोत्तम'' इति।।

## परब्रह्मण: सर्वकर्मफलप्रदत्वम् –

हृदये जीववज्जीवे योऽन्तर्यामितयास्थित: ज्ञेय: स्वतन्त्र ईशोऽसौ सर्वकर्मफलप्रद (शिक्षापत्रीश्लो 107) 'य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीर य आत्मानमन्तरो यमयति स त आत्मान्तर्याम्यमृत'' इति।

## परब्रह्मणोऽजगतोऽभिन्नभिमितोपादानत्वम्

स च सुक्ष्मचिदचिद्विशिष्टस्वरूपेण जगदुपादानकारणं भवति, संकल्पविशिष्टस्वरूपेण च निमित्तकारणं भवति, कालाद्यन्तर्यामिस्वरूपेण ज्ञानशक्त्यादिविशिष्टरूपेण च सहकारिकारणं भवति। कारणत्रिविधं उपादानं, निमित्तं सहकारि येति। तत्र कार्यरूपेण परिणामयोग्यं वस्तु उपादानकारणं- यथा घटं प्रति मृत्तिका। उपादानवस्तुन: कार्यरूपेण परिणाम य करोति स

---

कर्तैव निमित्तकारणं यथा घटं प्रति कुलाल: कार्योत्पत्त्युपकरणं वस्तु सहकारि कारणं -यथा घटं प्रति दण्डचक्रादय:। जगतस्तु त्रिविधमपि कारणं परमात्मैव, यत: स चिदचित्छरिर. स्वयं शरीरद्वारा बहुभवितुं समर्थ: सत्यसंकल्पश्च तस्मादुपादानत्वं निमितत्वं चाऽपि परब्रह्मणि सुघटम, . कारणसांकर्येऽपि कारणत्वस्यासाइकर्यम् विदचिद्विशिष्टत्वेन उपादानत्वात् संकल्पविशिष्टत्वेन निमित्तवाच्च।

ननु परमेश्वरस्य जगदुपादानत्वे सविकारत्वाऽऽवित्तिरिति चेन्न चिदचिद्रूपविशेषणविशिष्टस्य परमेश्वरस्य जगद्रूपेण परिणामेऽपि विशेषस्य विकाराऽभावात्. परिणामस्तु विशेषणद्वारेय'- यथोर्णनाभि: स्वरूपविकाराभावेऽपि, स्वशरीरभूविशेषणद्वारा तन्तुजालरूपकार्य प्रति भवत्युपादानमितिवत्, मनुस्यादिशरीरविशिष्टे स्वरूपतो निर्विकारे पुंसि बाल्य- युवत्व स्थविरत्व, स्थूलत्वादिवच्च विशेषणद्वारा विकाराश्रयत्वं परमेश्वरस्येष्टमेव।

ननूपादानस्य निमित्तकारणत्वे विरोध इति चेन्न। एकस्यैवोपादानत्वं निमित्तत्व च न विरोधावहम्, यथैक एव जीवात्मा तैस्तै: स्वसुखादीनुत्पादयति स्वयमेव च तेषां समयायिकारणं भवति तद्वत्, अथवैकस्येव कालस्य द्रव्यत्वेन रूपेण कालघटसंयोग प्रत्युपादानत्वं कालत्वेन रूपेण च निमितत्वं वैशेषिकमतवदिति। वर्णितं च 'यतो वा इमानि भूतानि जायन्त'' इत्यादिना परब्रह्मण: सकलसर्गाद्यसाधारणहेतुत्वम्। सूत्रकारेणाऽपि ''जज्माद्यस्य युत:'' इत्यादिना तथैव निर्णितम्। यद्वा उत्तरोत्तराऽवस्थाविशिष्टस्वरूपाऽपेक्षया तदनुगुणनियतपूर्वभाव्यवस्थाविशिष्टं उपादानम् यथा घटत्वावस्थाविशिष्टद्रव्याऽपेक्षया पिण्डत्वाऽवस्थाविशिष्टं तदेव द्रव्यम्। अथ परिणाम्यौन्मुख्यातिरिंकेनाऽकारेणाऽपेक्षितं कारण-निमित्तम्। अस्मिन्पक्षे सहकारिकारणस्य निमित्तेऽन्तर्भाव:।

अथ सृष्टौ प्रक्रियायां ईश्वरलोकस्त्रष्टुर्महाविष्णो: तेन सृष्टस्य चतुर्दशभुवनस्त्रष्टु समष्टिपुरूषस्य ब्रह्मण:, तेन सृष्टानां दक्षप्रजापतीनां सृष्ट्यपेक्षितस्य कालस्य परस्परमुत्पादकानां सर्वप्राणिनां च तत्तत्प्रवृत्तय: सर्वा यथा स्वस्मिन् पर्यपस्यन्ति तथाऽन्तरात्मा सन् प्रवृत्तिहेतुरजोगुणविशिष्ट: सन् सृजति, अत. परमेश्वरस्य सहकारिकारणत्वमपि भवतीति। परब्रह्मैवोपादानमुपादेयं चेति सिद्धान्त:।

सुक्ष्मचिदचिद्विशिष्टवेषेणोपादानता स्थूलचिदचिद्विशिष्टवेषणोपादेयता चेति सुक्ष्मचिदचिच्छरीरकत्वावस्थाप्रहाणपूर्वकस्थूलचिदचिच्छरीरकत्वरूपाऽवस्थान्तरप्राप्त्याऽविकृतस्वरूपस याऽपि परब्रह्मण उपादेयत्वं संगच्छते।

उपादानोपादेययोरनन्यत्वमितिसिद्धान्त:। ''नेह नानाऽस्ति किञ्चने'' त्यत्र नानात्वनिषेधो नाम विशेष्यभेदनिषेध:। परब्रह्मण: प्रथग्भूतं न किञ्चिदपि विशेष्यम्, सर्वस्य परब्रह्मणोऽपृथक्सिद्धविशेषणत्वात्। स्वसंकल्पेन शरीरात्मकमायात एव सर्वविकारसभवेन परब्रह्मात्मकप्रकृतिकारणत्वाऽभ्युपगममात्रेण न भाऽप्यनुपपत्ति:।

।।जयश्रीस्वामिनारायण।।

श्रीहरिवाक्यसुधासिन्धौ उपनिषदां प्रभाव:

---

## परब्रह्मण: सकलजगत्शरीरकत्वम् –

परब्रह्मैव निखिलचेतनाऽचेतनशरीरकं विशेषणयो: सौक्ष्म्यस्थौल्यरूपाऽवस्थाभेदेन कार्यावस्था कारणावस्थां चाऽभ्युपगच्छतीति सारूप्यमेवोपादानोपादादेययो:। नामादिभेदञ्चाऽवस्थाभेदविशेषनिबन्धन:। द्रव्यैक्येऽपि तदवस्थावैलक्षण्यादुत्पादविनाशयोरुपपत्ति:। अवस्थायोग एव उत्पत्ति:। अवस्थावियोग एव विनाश:। न तु सांख्यवत्- अभिव्यक्तिस्तिरोभावश्च। द्रव्यं नाऽपूर्वं, अवस्था त्वपूर्वा, अत उत्पत्याश्रयद्रव्यस्वरूपस्य सर्वदा विद्यमानतया सत्कार्यवाद: सुस्थ:। उत्पादकानि कुलालादीनि कारकाणि मुख्यानीति।

परिच्छिन्नैश्वर्यवतां ब्रह्मरूद्रादिविराऽदीनां न जगत्कारणम्। सुक्ष्मचिदचिद्विशिष्टपरब्रह्मण एव कारणत्वसंभव:। एतेन निरीश्वरसांख्यमीमांसकमतनिरास:, परमाणुकारणत्ववादिनैयायिकानां, प्रकृतिमात्रकारणतावादियोगपाशुपतसांख्यानां, निर्विशेषविज्ञानकारणतावद्यिद्वेतानां, क्षणिकविज्ञानकारणतावादि बोद्धानां युदुलकारणतावादिजैनानां केवलब्रह्मकारणता वादिशुद्धाद्वेतानां च मतानां निरास:।

## विशिष्टाद्वैतपदस्यव्युत्पत्ति: –

विशिष्टाद्वैतमित्यस्य विशिष्टस्य तस्य परब्रह्मणोऽद्वैतमिति विग्रह:। 'शिष्लृ विक्षेपणे, ततो भूते कर्मणि निष्ठा (क) प्रत्यये, विशिष्यते स्म- इति विशिष्ट्यम्। 'उभ' पूरणे इत्यस्मात् तौदादिकात् कर्तयौणादिके 'इ' प्रत्यये प्रकृतेश्च 'द्व' आदेशे 'द्वि' इति, ततो भावार्थ 'तल्' प्रत्यये, 'द्वयोर्भावो द्विता, तत: प्रज्ञादे: आकृतिगणत्वात् स्वार्थे 'अणि' द्वेतमिति न द्वैतम् अद्वैतम्। अथवा गत्यर्थधातूनां प्राप्त्याद्यर्थकत्वेन 'इण्'' गतावित्यस्मादादिकात् भावे क्त प्रत्यये, इयते प्राप्यते, ज्ञायते वा 'इतम्' द्वाभ्यां प्रकाराभ्यां इतं- द्वीतम् द्वीतमेव द्वैतं, न द्वैतम्, अद्वैतम, विशिष्टस्य अद्वैतं विशिष्टाद्वैतमिति। न तु 'विशिष्टं च विशिष्टं च विशिष्टं ब्रह्म विशिष्टे- कार्यावस्थाविशिष्टं ब्रह्म विशिष्टे- कार्यावस्थाविशिष्टं ब्रह्म तयोरद्वैतं विशिष्टाद्वैतमिति समास:। 'वियद्वायुस्तेज: सलिलमवनिञ्चेत्यदिदं विकाराणां या च प्रकृतिरपि यञ्चेतनगण:। न चैषामेकं वा यदगुणतया स्यात्- तनुतया- प्रकारीभूयास्ते निखिलमपि यद्ब्रह्मण इदम्। ब्रह्मपदस्यात्र पर ब्रह्मपरत्वम्। ''तथापिधैस्तु तत्वैस्तैर्विशिष्टमखिलात्मकम्। तत्वमेकं परं ब्रह्म श्रूयते श्रुतिमूर्धसु '' विशिष्टस्याऽस्य नत्वस्य सजातीयाऽन्यशून्यता। विशिष्टाद्वैतमेतत्तु विशेषणबहुत्वत: (शिक्षापत्रीभाष्यम्।

## परब्रह्मणो व्यापकत्वम् –

स परमात्मा विभु:। विभुत्वं व्यापकत्वम्, तच्च त्रिधा स्वरूपतो धर्मभूतज्ञानतो विग्रहतश्चेति। स्वरूपं सर्वत्रान्तरात्मा। नित्यज्ञानं सर्वत्र विषयतासंसर्गेण। विग्रह: सर्वत्र तच्छरीरसन्निवेश:। सत्यत्वज्ञानत्वाऽमलत्वाऽऽनन्दत्वादयो धर्मा: परमेश्वरस्वरूपनिरूपका ज्ञानैश्वर्यशक्त्यादयो निरूपितस्वरूपधर्मा:, सर्वज्ञत्व सर्वशक्तित्वादय: सृष्ट्युपयुक्ताधर्मा, वात्सल्यसौशिल्यसौलभ्यादय:- आश्रयणोपयुक्ता धर्मा: कारण्यादयो रक्षणोपयुक्ताधर्मा.। स च

।।जयश्रीस्वामिनारायण।।
श्रीहरिवाक्यसुधासिन्धौ उपनिषदां प्रभाव:

हिरण्मयकोशब्रह्माण्डादिसृष्टिसर्जनानन्तरं महाविष्णुविराट्पुरूषब्रह्मकालादिष्वन्तर्यामितयास्थित्वाऽन्त: सृष्टिं करोतीति। विष्ण्ववतारररूपेणमनुकालाद्यन्तर्यामिरूपेण च स्थित्वा रक्षको भवति, रूद्रकालाऽन्तकादीनामन्तर्यामितया संहारको भवति। स च अनन्त. त्रिविधपरिच्छेदरहित इत्यर्थ:, त्रिविधवपरिच्छेदस्तु देशत: कालतो वस्तुत: इति। स च परमेश्वर: पर- व्यूह विभवान्तर्याम्यचर्चावतारररूपेण पञ्चधा भवतीति केचित् स्वीकुर्वन्ति। साम्प्रदायिकास्तु परमेश्वर श्री स्वामिनारायण: परान्तर्याम्यर्चारूपस्त्रिधा। व्यूहो वासुदेवादि:, विभवस्तवतारा:।

## परस्वरूप वर्णनम् –

तत्र परो नाम श्रीमन्मुक्तानन्दब्रह्मानन्दसच्चिदानन्दवासुदेवानन्दौत्तमराजजयाललिताद्यनन्तभक्तै· सेवित· परमाक्षरधाम्नि दिव्यविभूतिमयसिंहासने विराजमानो दिव्यमंगलनवलकिशोरविग्रहो द्विभुजोदिव्यकिरीटाऽऽभूषणाऽलंकारादिविभूषितोऽनन्तमुक्तेसहकृताऽक्षरब्रह्मणाऽनवरतवन्दितसेवित चरणकमलोऽनेकदिव्यकल्याणगुणशक्त्यैश्वर्यादिविशिष्ट: श्री स्वामिनारायणपरमात्मा विराजते, स एव परब्रह्म पुरूषोत्तमाऽक्षरातीत पुरूषोत्तम- घनश्याममहाराज श्रीहरि हरिकृष्ण सहजानन्दादिशब्दवाच्य इति स एव निरतिशयसर्वज्ञताबीजं सर्वाविर्भावस्वामी सर्वदिव्यविभूतिस्वामी सर्वसुखमय: सर्वानन्दमय: स्वत: पूर्ण: सर्वनियन्ता सर्वाऽऽधार. सर्वसाक्षी सर्वान्तिर्यामी सर्वोपास्यमूर्ति: सर्वरसमयाऽखण्डमूर्ति: सर्वैश्वर्यशक्तिविभूतिभाजनरूप. सर्वसुन्दरतालावण्यनभाजनरूप. अपारकरूणानिधिरनवधिकातिशयकल्याणागुणभाजनरूपो ब्रह्मविद्यादिभिरपि यस्य वर्णनमगोचरमिति।

## अन्तर्यामि वर्णनम् –

अन्तर्यामी- अक्षरब्रह्मपर्यन्तानां यावज्जडचेतनानां स्वरूपे सुहृदत्वेन स्थित.।

## अर्चावतारवर्णनम् –

अर्चा- प्रतिमामूर्तिरितियावत्, स च देशकालनैयत्यरहित. स्वाश्रिताऽभि मत सुवर्णरजतशिलामणिकाष्ठादिकं शरीरतया स्वीकृत्य तस्मिन्नप्राकृतशरीर विशिष्ट: सन्नर्चकभावनानुकूल स्नानभोजनाऽऽसन शयनस्थिति: सर्वसहिष्णु: परिपूर्णो गृहमन्दिरग्रामनगरवनशैलगुहादिषु पवित्र स्थलेषु देवसिद्धमनुष्यादिभि: प्रतिष्ठापितो मूर्तिविशेष: श्री हरिकृष्णमहाराज- घनश्याममहाराज- स्वामिनारायणाऽक्षरातीतिपुरूषोत्तमाद्यभिधानैर्व्यवह्यिमाण इति।।

## व्यूहरूपस्यवर्णनम् –

व्यूह:-नित्यगोलोकस्थो निरञ्जनब्रह्मपुरूषोऽनादिश्रीकृष्णो वासुदेवसंकर्षणप्रद्युम्नानिरूद्धभेदेन चतुर्धाऽवस्थित:, तत्र वासुदेवे ज्ञानबलैश्वर्यवीर्यतेजांसि षड्गुणा: पुरूषोत्तमाऽपेक्षया सातिशया वर्तन्ते। सकर्षणे ज्ञानं बलं चेति गुणद्वयं मुग्व्यम्

प्रद्युम्न ऐश्वर्यवीर्ययुक्त: । अनिरूद्ध: शक्तितेजोयुक्त: । एते चत्वारोऽपि तत्तद्वेशाऽऽभूषणाऽऽयुधकार्यभेदेन प्रत्येकं त्रिधा वि विभद्यन्ते, तद्यथा- केशवनारायणमाधवरूपत्रयं वासुदेवाद्विभाप्यते, तत्र कनकप्रभ: केशवश्चक्रधर:, श्यामवर्णो नारायणश्चतु: शंखधर:, मणिप्रभो माधवश्चतुर्गदाधर इति। अथ गोविन्दविष्णुमधुसूदनरूपत्रयं संकर्षणाद्विभाव्यते, तत्र चन्द्रप्रभो गोविन्दश्चतु: शाङ्र्गधर:, पद्मकिञ्जल्कसन्निभो विष्णुश्चतुर्हलधर:, अब्जाऽऽभो मधुसूदनश्चतुर्मूशलधर:। अथ त्रिविक्रमवामनश्रीधररूपत्रयं प्रद्युम्नादविभाव्यते, तत्र अग्निवर्णस्त्रिविक्रमश्चतु: संगधर:, बालसूर्याभो वामनश्चतुर्वज्रधर:, पुण्डरीकाभ: श्रीधरश्चतुष्पद्दिशधर:, अथ हृषीकेशपद्मनाभदामोदररूपत्रयं अनिरूद्धाद् विभाज्यते, तत्र तडित्प्रभो हृषिकेशश्चतुर्मुद्गरधर:, सूर्याभ: पद्मनाभ: पञ्चायुधधर:, इन्द्रगोपनिभो दामोदरश्चतुष्पाशधर:, व्यूहा:सर्वेचतुर्भुजा इति।

**विभवरूपवर्णनम् –**

विभव: तत्तच्छक्तिसहिततत्तत्सजातीयरूपेणाऽविर्भूतोऽवतारविशेष, सर्वेऽवतारा महाविष्णुरूपशरीरविशिष्टपरमेश्वरादाविर्भवन्ति। ते च मुख्य- गौण- पूर्णांशाऽऽवेशाद्यवतारा बहुविधा असंख्याता:।

**तत्र मुख्यावतार:–** दिव्यस्वरूपेणाऽकस्मात्प्रकटीभूत: यथा प्रह्लाद रक्षार्थं नृसिंहाऽवतार:, भस्मासुरनाशार्थं मोहिन्यवतार:, मत्स्यकूर्महयग्रीवादयश्चापि।

**गौणाऽवतार:–** तत्तत्कार्यकर्तृत्वेन रूपेण नियतक्लृप्तावतार, यथा ब्रह्माण्डसृष्ट्त्वेन विधिरूपोऽवतार:, तद्रक्षणकतृत्वेन विष्णुरूपोऽवतार:, तत्संहारकतृत्वेन शिवरूपोऽवतार, भारतयुद्धनिमित्वेनाऽर्जुनरूपोऽवतार:, वेदानां समग्रविद्याप्रकाशनकतृत्वेन व्यासरूपोऽवतार इत्यादय:।

**पूर्णावतार:–** षोडशकलाभिस्तन्न्यूनकलाभिर्वा परिपूर्ण: यथा श्रीकृष्णरामचन्द्रवामनकल्क्याद्यवतारा:।

**अंशावतार:–** यत्किञ्चित्कलावतार:, यथा यत्र चेतनविशेषे तस्य ज्ञानकलैश्वर्याऽऽत्मकर्यात्किञ्चिदंश अवतरति, तथा गोपालनन्द स्वामिप्रभृतय:।

**आवेशांऽवतार:–** यत्र तस्यावेशो भवति, यथा परशुरामकपिलदेवदत्तात्रेयादय:।

अथ स्वरूपाऽवतारा अपि भवन्ति, यथा परमेश्वरेण सहैकभावमापन्नास्तत्परमैकान्तिन सत्पुरूषा:। अत एव सत्पुरूषरूपेण परमेश्वर: प्रत्यक्षो विराजते इति सिद्धान्तसंगति:। अवताराणामवतरणे स्वेच्छा हेतुर्न तु कर्म, प्रयोजनन्तु दुष्कृतप्रहाणसत्पुरूषपरित्राणात्मकमिति।

---

एवमाध्यात्मिकतत्वपरिपूर्णश्रीहरिवाक्यसुधासिन्धायुक्तजीवेश्वरमायाब्रह्मपरब्रह्मात्मकतत्वा औपनिषद्द्रष्ट्या सुतरां संगता इति शम्।